**Anthologia sanscritica glossario instrvcta / In vsvm scholarvm edidit Christianvs Lassen ... Denvo adornavit Ioannes Gildemeister.**

**Contributors**

Lassen, Christian, 1800-1876.
Gildemeister, Johann, 1812-1890.

**Publication/Creation**

Bonnae ad Rhenvm : Apvd A. Marcvm, 1868.

**Persistent URL**

https://wellcomecollection.org/works/cenv6zkf

**License and attribution**

This work has been identified as being free of known restrictions under copyright law, including all related and neighbouring rights and is being made available under the Creative Commons, Public Domain Mark.

You can copy, modify, distribute and perform the work, even for commercial purposes, without asking permission.

wellcome collection

Wellcome Collection
183 Euston Road
London NW1 2BE UK
T +44 (0)20 7611 8722
E library@wellcomecollection.org
https://wellcomecollection.org

22500849204

7/-

Frank Jevons.

P. B. SANSKRIT 333

Digitized by the Internet Archive
in 2018 with funding from
Wellcome Library

https://archive.org/details/b30092887

# ANTHOLOGIA SANSCRITICA

## GLOSSARIO INSTRVCTA.

IN VSVM SCHOLARVM

EDIDIT


CHRISTIANVS LASSEN

PHIL. DR. LITERARVM INDICARVM IN VNIVERSITATE BONNENSI PROFESSOR P. O.
CET. CET.


DENVO ADORNAVIT


IOANNES GILDEMEISTER

THEOL. ET PHIL. DR. LITERARVM ORIENTALIVM IN EADEM VNIVERSITATE
PROFESSOR P. O.



BONNAE AD RHENVM
APVD ADOLPHVM MARCVM
MDCCCLXV.

WELLCOME
LIBRARY
INSTITUTE

P.B. Sansk. 333

## NOVI EDITORIS PROOEMIVM.

Postquam anthologiae ante quinque lustra editae exemplaria omnia divendita sunt, libro ad scholarum usum utilissimo aegre et ipse carui et alios multos carere accepi. Quamquam enim ex illo inde tempore haud unum eius generis opus egregium editum sit, desiderio tamen satisfactum non est, quum aut glossario in hac lexicorum sanscriticorum penuria necessario omnino non instructa essent, aut glossario quidem instructa sed lingua inter nos minus vulgata conscripto, aut propter maiorem ambitum et pretium eorum, qui linguam discere coeperunt, rationibus minus convenirent. Itaque ipse mihi auctor fuit Lassenivs, quem a tali labore graviores occupationes distinuerunt, ut novae editionis eiusque pro rerum, qui nunc est, statu aliquantum mutatae curam susciperem. Nam librum prorsus eundem, qualis olim eo consilio adornatus est, ut non nisi inedita contineret, repetere non visum est, quum usus docuerit, partem priorem et faciliorem nimis distare ab altera difficiliore, quam ut, qui illam legerint, huic intelligendae pares esse possint. Itaque praeter paucas illas e veda desumptas paginas Dhûrtasamâgamam, quod praeterea ante collatos codices Londini et Oxonii reconditos denuo edi vix liceret, nunc saltem omittendum inque eius locum, ut idem libri ambitus servaretur, epici potissimum stili exempla,

quorum nimis pauca prior exhibuerat editio, et nonnulla huic proxima substituenda censui. His perlectis qui altiora petunt amplam, qua se in difficilioribus exerceant, materiem in aliis libris, imprimis Benfeyano, invenient.

Quae de singulis libri partibus exponenda habeo, haec sunt.

Quae primum locum occupant, e libro sumpta sunt ***Vetâlapanc'avinçati*** s. ***corpore viginti quinque lemuris narrationum***, cuius auctori codices aut Çivadâsae aut G'ambhaladattae nomen tribuunt. De utroque certi nil constat; priori adscripta etiam alia opera similia, ut Kathârṇava, feruntur; hunc e G'ainarum secta fuisse ipsum nomen arguit. De libri aetate statuendum est, eum Somadeva, qui saeculo duodecimo vixisse putatur, antiquiorem esse; apparet enim hunc, quum opus in maiorem suam collectionem reciperet et retractaret, fabularum summam fere eandem eundemque ordinem iam invenisse (Cf. Brockhavs *Berichte der Saechs. Ges. d. Wiss.* 1853 *p.* 181 *sqq.*). Postea vero et singula verba et res narratas paulatim mutationes varias habuisse, tum codices quos habemus recentissimi, tum interpretationes et ipsa Somadevae narratio ostendit. Ab initio librum versibus traditum fuisse inde colligendum videtur, quod vel in ipsa narratione integri nonnulli servati sunt, e gr. p. 27, v. 7. 8, quos statim sequitur eadem res verbis vulgaribus exposita; aliorum autem per prosam hic illic quasi natant partes, quales sunt p. 13, 3 एतस्मिन्नेव प्रस्तावे 4 कालसर्पेन दंशिता, ita ut interdum, uti faciendum erat p. 15, 6—10, restitui potuerint.

Codices in quibus editio nititur tres sunt, in bibliotheca Indica Londini asservati, devanagaricis literis omnes exarati:

A, scriptus anno samvat 1849, qui nobis 1792 est, foliorum 87, numero 1765 insignitus, olim Colebrookii, in cuius catalogo signum gerit 48 K.

B, eodem fere tempore scriptus in foliis 53 numero 1668 signatus, et ipse e libris Colebrookianis (59 K). Hic eandem quam ille recensionem continet, sed aliquanto, ut in Panc'atantra dicere solemus, ornatiorem, quamquam narratio non differt.

C scriptus samv. 1865 (Chr. 1808) foliorum 93 e libris regis Gaikovar. Is in singulis nonnullis a prioribus recedit et in narratione quoque plura mutat.

Praeter hos innotuere duo codices in usum nostrum non conversi. Alter est Bodleianus, descriptus in Aufrechtii Catalogo n. 327 p. 153, qui quum multo magis cum reliquis discrepet, personarum nomina prorsus alia praebeat et versibus immixtis careat, cum illis conferri omnino non potuit; ceterum G'ambhaladattae nomen prae se fert. Alter, qui ubi terrarum nunc quaerendus sit me latet, commemoratur a docto quodam Anglo, qui nomine suo non addito versionis Hindicae partem Anglice interpretatus in annotatione quaedam de eo affert (*Asiatic Journal* 1816. II *p.* 31. 139). Inde discimus, distichon p. 3, 16. 17 positum quod inter meos solus C praebet, etiam in hoc inveniri, nam ita habet interpres: ‚*that he wants him as being a person of perfect purity* (aliud igitur atque धीर legit vocabulum) *and therefore fit to act as his Uttara Sadhaca or assistant*', quibus addit: ‚*This person is employed to convey the body to the spot required and during the rites performed by the principal, to chime in, as a respondent with the burden of his* japa *or prayer.*' Aliter se habent ea, quae loco p. 5, 21 respondent, nam ibi puella nymphaea ad aures admota indicat se in Çekhara urbe in

regno Karṇotpalae habitare; ad dentem admota, patrem se habere Dantâghâtam (qui igitur a rege diversus est); ad cor admota, sibi Padmâvatis nomen seque amore captam esse. Ex quibus liber, si quando in lucem veniet, facile agnosci poterit.

Lassenivs mihi tradiderat apographum, quod anno 1824 Londini ex tribus illis codicibus paraverat eo, quod in praefatione prioris editionis p. VIII exposuit, cónsilio ut in vestigio ex ipsis codicibus aptam componeret narrationem, neque id agens, ut omnes eorum discrepantias enotaret, quas ad primam tantum fabulam pleniores, ad reliquas rariores addidit. Quum de locis haud paucis dubitatio restaret, eorum, in quibus accuratiora de librorum manuscriptorum lectione cognoscere mea intererat, indicem misi ad Cl. Avfrechtivm professorem iam Edinensem, nec gravatus est vir humanissimus ad quaestiones meas de codd. A et B (nam C inveniri non potuerat) non solum plenissime respondere, sed etiam hic illic coniecturas et observationes suas addere, quas in annotatione diligenter commemorare meum esse putavi. Atque quum fama esset bibliothecae Gottingensi nuper additum esse scriptum libri exemplum, literis adii Cl. Benfeyvm, qui qua est comitate statim de lectionibus quas sciscitatus eram, accuratissime me certiorem fecit; sed apparuit mox, librum Gottingensem descriptum esse ex A Londinensi, ita ut ad augendum criticum apparatum non valeret. Ne quid praeteream, etiam ad ea, quae ex Somadevae libro Cl. Brockhavsivs publici iuris fecerat, habui respectum, et accurate contuli conversiones recentiores Bengalica et Hindica dialectis conscriptas, illa usus ex editione, quae Calcuttae ex officina Rogeri et sociorum a. 1903 (1846) pagg. 163. 8 prodiit, hac ex novissima

Barkeriana Hertfort. 1855. 8 foras data. Ex his magis quem narrationis nexum, quam quae singula verba sanscriticum, e quo profectae sunt, archetypum praebuerit perspici poterat; quod non mirabitur, qui cognoverit, translationem Hindicam ex interpretatione vrag'ensi tempore Muhammadis Shâhi (itaque circiter annum 1719) iussu G'ayasinhae, G'ayanagarae reguli studiis astronomicis clari, a Sûrat poeta adornata (*Asiat. Journ.* l. l. *Journ. des Sav.* 1836 *p.* 414) fluxisse et anno 1805 eo consilio, ut vocabula Sanscritica et Hindica quam maxime fieri posset cum Arabicis et Persicis commutarentur, institutam fuisse, Bengalicam autem et ipsam ex translatione quadam Hindica, at alia, manasse. Nihilominus tamen eas non sine omni fructu comparatas fuisse annotatio docebit. Nihili autem fuit fabularum editio mutilata e Lasseniana repetita, cui expositio grammatica in discipulorum gratiam a discipulo confecta addita est: *Cinque novelle Indiane* (12, 17. 17, 9. 18, 7. 23, 12. 29, 11 sqq.) *del Vetalapanc'avi'sati tradotte litteralmente in Latino col testo sanscrito a fronte, precedute da una prefazione e seguite da un commento grammaticale* etc. *per B. M. Bertolazzi. Bassano* 1851. *pp.* XXII. 152. 8. Ad disticha narrationi inserta comparandi erant loci aliorum, in quibus inveniuntur, librorum, quorum post priorem editionem plures editi sunt: Galani Μεταφράσεων Πρόδρομος. Athen. 1845. 8., Panc'atantra, posteriora Mahâbhâratae volumina, Haeberlini Kâvyasangraha Calc. 1847. 8. alii. Post paginas sanscritas cum annotationibus typis exscriptas prodiit Boehtlingkii Sententiarum Indicarum Thesaurus, e quo certissimae duorum locorum p. 10, 1 et 12, 3 emendationes in glossario et corrigendorum indice supplendae erant. Tandem nuperrime accessit

sententiarum 342 in capita 17 distributarum, quae ad C'ânakyam referuntur, collectio, nomine Vriddhac'ânâkhyae (sic) cum interpretatione Mahârâshtrica anno 1782 (1860) in Bombay urbe pagg. 86 forma octon. mai. lapide exscripta, in qua permulta dicta sanscrite hucusque nondum vel saltem per Galanum tantum cognita leguntur. In hac duodecim inveniuntur nostri libelli disticha, non sine quadam lectionis discrepantia: p. 3, 3 = cap. XIV, 17 (सुसिद्धमौषधं, quod explicatur आपपास सिद्धकालेलें औषध, ac si सु° lectum fuerit; कुभुक्तं explicatur कदन्न, quod Molesworthio est: ‚*A general term for the very lowest sorts of grain unfit for offering etc.*'; pro कुत्सितं कर्म habet कुश्रुतं चैव); p. 11, 9 = VII, 1 (pro गृज्जनं च habet नीचवाक्यं); p. 17, 3 = II, 1; p. 22, 3 = X, 4; p. 25, 4 = I, 11 (-कालेषु); p. 26, 4 = II, 3; p. 26, 12 = II, 14 (habet cum Galano अपमानो; alia nonnulla aliter); p. 27, 6 = XVII, 10 (minus bene alter stichus hic est: न तीर्थसेवया तद्धर्तुः पादोदकैर्यथा); p. 27, 19 = VI, 6 (तादृशो जायते बुद्धिर्व्यवसायो ऽपि तादृशः bene); p. 28, 20 = IV, 11; p. 31, 7 = III, 12 (paulo aliter); P 62 = XIII, 20.

Primum libri Çukasaptatis caput Lassenivs ediderat e codice Londinensi, praeter quem tunc temporis notus erat nullus. Postea accessit Bodleianus in Aufrechtii catalogo commemoratus n. 330 p. 156, cuius accuratam cum editione collationem eidem viro doctissimo debui. Inde apparet, librum Oxoniensem prorsus eandem operis epitomen continere, quam Londinensis praebet, ita ut ad huius verba emendanda perutilis sit. Etiam Petropolin ante aliquot annos codex delatus est, sed is ab initio mutilus. Aliud adiumentum praebuit Galani versio Graeca (Χιτοπαδασσα ἢ Παντσατασντρα καὶ ψίττακου μυθολογίαι κ. τ. λ. Athen. 1851. 8.) quae quanquam brevior sit saepe eadem verba, vel eodem modo

corrupta, habet atque in uno saltem loco veram indicavit lectionem. Ne quis putet etiam Bengalicam libri translationem *Tota itihâs* inscriptam et saepius editam in quaestionem vocandam fuisse, observo, hanc fluxisse ex Persica illa, quam Gladwinius a. 1801, edidit epitome a Muhammade Qadirio confecta, et ad verba sanscritica diiudicanda nihil facere.

In constituendis harum narrationum, imprimis Vetâlae, verbis non id spectare potui, ut editio critica secundum artis leges exhiberetur. Prohibebar codicum male scriptorum et inter se discrepantium conditione quominus unum prae ceteris sequerer, quum nullus per se textum praeberet satis integrum; prohibebar etiam magis eo, quod non omnes omnium codicum lectiones ante oculos haberem. Pro instituti igitur ratione id tantum spectavi, ut orationem, quantum fieri posset, tersam et ad intelligendum aptam redderem, ita tamen, ut, nisi re indicata, nihil praeberem quod non haustum esset ex codicibus; imprimis nullum sine indicio admisi vocabulum, quod codicum auctoritas non tueretur. Omnia autem menda grammatica et librariorum memorare superfluum duxi, cuius generis multa sunt et mira: e. gr. पुरुषैकं legitur p. 10, 12 pro पुरुषमेकं; गत्वा p. 14, 4 pro गतः; पतित्यक्ता p. 20, 11 pro पतिं त्यक्त्वा. In annotatione codicum scripturam attuli signis ABC usus; ubi *ms* posui, e schedis Lassenii non elucebat, in quonam libro vox inveniretur. Disticha multo plura, at plerumque mediocria praebent libri scripti; ex iis, quae servaverat prior editio, fuerunt quae omitti posse videbantur; nonnulla de novo addidi.

Fabulae de thoe, quam e Mahâbhârata I 5566 sqq. sumpserat Lassenius, duas alias ad idem opus pertinentes adiunxi e numero earum, quae breviter rem enar-

rant neque longis ambagibus et sententiis fucatae a pristina quae fabulam decet simplicitate aberrant, alteram de fele pietatem prae se ferente V, 5422—47, alteram de cane foedum animi ingrati exemplum praebente XII, 4256—4304. Satis integra in editione Calcuttensi sunt verba, ita ut nisi in nonnullis mendis typographicis correctoris manu opus non fuerit.

Ad episodium de Kaṇḍu e Brahmapurâṇa, quem librum Wilso saeculo decimo tertio aut quarto ex rationibus satis probabilibus assignat (*JRAS* V, 71), edendum tres adhibuit codices Lassenivs eorumque lectiones fere omnes in schedis enotaverat. Duo Londinenses sunt, alter A scriptus circa annum 1806, in bibliotheca Indica numerum 1314, in catalogo Colebrookiano numerum P 150 gerens, alter B olim Todii, nunc ad bibliothecam societatis Asiaticae pertinens, unus Parisiensis est P Bengalicis litteris exaratus, XXIV *Beng.* signatus et in Hamiltonis catalogo p. 18 descriptus. Nuper publico usui patuit liber e Wilsonis bibliotheca in Bodleianam illatus, de quo vide Catal. p. 17. Vt etiam hoc passim uterer, iterum effecit Avfrechtii humanitas, qui locos a me designatos cum hoc et cum codice A contulit. Libri hi inter se ita differunt, ut partes narrationis ab aliis absint, P autem longa descriptione e Mahâbhârata inserta plenior sit. In singulis plura mutavi, imprimis ut metri legibus nunc accuratius cognitis satisfacerem, etiam hic ita versatus, ut quae exhibuerim talia in codicibus inveniantur, nisi aliud doceat annotatio.

Ad nova additamenta pertinet episodium de Ṛishyaçringa. Râmâyaṇae recensiones nobis cognitae sunt quinque, tres apud Indos ipsos usitatae: septentrionalis, quae et commentatorum dicta est, Bengalica

s. Gaudana et tertia, quae occidentalis nomine designanda videtur, duaeque ab Europaeis adornatae et ex illis mixtae: Çrîrâmapurana et (in primo saltem libro) Schlegeliana. Quamquam hac in re uberrimis subsidiis criticis instructus formam narrationis tunc quum haec typis exscriberentur, adhuc incognitam*) exhibere potuissem: aut formam septentrionalem ex octo, aut occidentalem e sex codicibus (Todiano, Malcolmiano post Schlegeliano, Berolinensibus tribus 437. 438. 439 (apud Weberum) eoque, quem Schlegelius G nominavit et qui ex parte hanc, ex parte Bengalicam recensionem exhibet), consultius tamen duxi eam repetere, quam Bengali praebent et quam adhibita editione Çrîrâmapurana in suam receperat Schlegelius, utpote lepidiorem et antiquiore recensione hic satis exili iucundiorem. Ad manus erant codicum, quos Schlegelius K et I nominavit, collationes, quibus accesserunt tum Gorresii editio, qui praeter illos etiam novo codice usus est, tum huius recensionis partes in libri Berolinensis 438 margine scriptae. Sed in perpaucis locis a Schlegelio et Gorresio mihi deflectendum erat.

Tum e Mahâbhârata, ut rerum aliqua varietas esset, elegi locos duos, alterum gnomici, mythologici alterum argumenti. Ille, e libro XIII, 297—370 de-

*) Nunc enim recensio septentrionalis et ea quidem forma, quam Raghunâthas scholiastes constituit et quam reliquis praestantiorem esse codicum collationibus edoctus sum, in Bombay urbe 1859 typis mandata est. Eandem tenere dicitur editio Calcuttensis eodem anno emissa. Quod ad aliam editionem attinet Calcuttae literis Bengalicis cum CrîyadunâthaNyâyapanc'ânanae explicatione Bengalica a. 1916 (1859) edi coeptam, cuius notitiam Cl. ROERIO debeo, haec mihi ex Gorresiana videtur repetita, quum levissimis exceptis cum ea prorsus conveniat. In hoc capite e gr. in dist. 45 tantum discrepat, praebet enim perperam न हि दृश्यं pro न हीदृशं, contra in dist. 54 retinet श्रग्रां neque sticho adulterino 60 *a* caret.

sumptus, at nonnullis distichis, qui ad rem minus faciunt, decurtatus quaestionem saepius agitatam de effectu et mercede facinorum humanorum tractat, et docet, quomodo eius difficultates ab Indis evitentur sua de animis per varia vitae genera migrantibus doctrina; hic (I 1103—88) fabulam de ambrosiae origine enarrat, quam poetae tam saepe spectant et significant, ut eius cognitione nemo qui sanscritica legit carere possit. Ceterum hoc caput ex recentioribus Mahâbhâratae partibus esse, tum forma metrica demonstrat, tum efficitur eo quod d. 86 divum numen नर Arǵunae nomine किरीटिन् designetur.

Ṛitusanhârae caput primum olim ex uno tantum codice edi potuerat; iam conferendae erant editiones Bohlenii et Haeberlini.

Ad haec Avfrechtii officio, qui paginas catalogi sui nondum publici iuris factas in hunc usum transmisit, addere potui caput novi generis idque historici, narrationem de Bauddharum persecutione, instigante Kumârilabhatta sub rege Sudhanvane, de quo aliunde nil constat, haud diu post annum 680 ex Lassenii (*Ind. Alt. K.* IV, 709) computatione instituta, quam Mâdhavas, ut volunt, clarissimus saeculi decimi quarti scriptor, in epitome libri de Çankarae triumpho compositi exhibet. Liber iam dudum notus erat ex dissertatione, quam Wilso priori lexici editioni praemisit, p. XVIII; plenius nunc descriptus est in catalogo Bodleiano n. 626, p. 252. Mirum est Indos etiam res ad historiae fidem tractandas quin vestitu mythologico ornarent sibi temperare non potuisse.

Tandem quum dicendi genus, quo scholiastae utuntur, quamprimum cognoscere utile sit, paginas e constituto libri ambitu reliquas scholiis facilioribus desti-

nare visum est. Quam ad rem idoneas se praestant Nârâyanae, scriptoris ut perhibetur quingentis annis superioris, glossae, quibus Uttaranaishadac'aritam a Çrîharsha saeculo duodecimo compositum explicat. Sumendus erat locus continuus, at ambitu minor; eum igitur, in quo (XX 41—49. 52—57) Nalas lunae ortum describit, imo non describit, sed argutiis persequitur, elegi, secutus editionem Roerii Calc. 1855 foras datam, ita tamen ut quae solas formas grammaticas spectarent annotationes, quippe ad quas intelligendas totius Indorum grammatices cognitione opus est, omitterem.

In scribendis singulis plerumque prioris editionis rationem secutus sum. Ita simplicem ड retinui, quam vel contra Indorum praeceptum in prosodiae magis quam grammaticae rationibus positum recte usurpari puto. Nasalis न ante श non in ञ mutatae causa, quanquam hoc tradita in quibusdam libris vedicis scribendi lege defendi possit, in typorum potius conditione sita erat. Quaedam contra vulgarem usum novavi, ubi certo fieri potuit; sunt tamen multa, in quibus incertus haereas, maxime ubi inter sibilantes aut inter ब et व eligendum est, quum iam antiquitus literae hae inter se permutatae sint et multa, si ex origine iudicaveris, aperte falsa (ad unum शश pro शस relegare sufficit) inveteraverint inque civitatem quasi pervenerint, ut loco pelli vix possint; in aliis originis obscuritas iudicio obstat. Vbi in binorum vocabulorum appulsu र una e duabus orta est, quum र non ad alteram tantum vocem pertinere censeri possit, vocabula non disiungenda esse putavi.

In adornando glossario difficultatem aliquam crearunt vocum origines, quarum quae certis grammaticae legibus nituntur in libro tironibus destinato indicandae

erant. Sed certi fines hic constitui non poterant ita ut etiam etyma quae in coniectura posita sunt excludi non liceret. Itaque etiam talia dedi quae altioris indaginis sunt, et ea quidem, quae mihi veri simillima viderentur, etsi haud ignorarem, ab aliis aliter de multis sentiri. At quum brevitati studendum esset, in dubiis neque aliorum sententiae iudicandae neque meae probandae locus erat et interdum origines, de quibus longior evitari non potuisset disceptatio ab hoc libro aliena, tacere malui. Etiam in hac re magno usui fuit lexicon Petropolitanum, quo uti potui usque ad प्रति particulam; nonnullas voces et formas, quas in eo non viderem consilio praeteritas quibusve locupletari posset, asterisco distinxi.

Nil restat quam ut corrigendorum, quorum iusto maior est numerus, tabulam, in quam etiam quae postea emendanda se praebuerunt recepta sunt, renuntiem eosque, qui libro usuri sunt, ut antea menda tollant, praemoneam et rogem.

## CORRIGENDA.

p. 1 v. 9 रुष l. रुस — 4, 4 राज्ञा l. राज्ञा शिंशिपवृत्तं प्रचलितः। राज्ञा — 5, 4 नीलोत्पलैः l. नीलोत्पल° — 5, 17 गोर्यद्दोनां l. गोर्याद्दोनां — 6, 6 गवति l. भवति — 10, 1 मित्रं l. मैत्रं — 10, 18 पृष्ठः l. पृष्टः — 10, 20 बुरुष l. पुरुष — 12, 3 पपिडतै° l. पिपिडतै° — 13, 8 -त्मकाः l. -त्मिकाः — 17, 9 एलपुरं l. एलापुरं — 23, 22 सुभट्टा l. सुभटा — 26, 16 गुवपावति l. गुणावति — 16, 20 -श्रमे l. -श्रये — 34, 8 कथयानि l. कथयामि — 39, 19 परिज्ञाय l. प्रतिज्ञाय — 46, 7 निस्वनः l. निःस्वनः — 50, 18 -ज्ञन्मा l. -ज्ञन्या — 50, 22 १४ l. २४ — 51, 22 पत्रैश्च l. पत्त्रैश्च — 52, 21 -मक्कालि° l. -माक्कालि° — 57; 12 मैत्र° l. मैत्त्र° — 58, 4. ऋषिणा l. ऋषिणा — 58, 8 प्राचत° l. प्राचेत° — 59, 14 प्रन्यु° l. प्रत्यु° — 60, 5 शिञ्चित l. शिञ्जित — 65, 4 वसिष्टो l. वसिष्ठो — 74, 10 महासुरैः l. सुरासुरैः — 74, 22 सर्वशः l. सर्वतः — 79, 9 लेलिहि l. लेलिह — 79, 11 प्रवेशितं l. प्रवेरितं — 82, 11 निस्वनैः l. निःस्वनैः — 85, 6 त्रिक्तं l. त्रिङ्गं — 90, 21 अपिः लोकगुरु l. अपि लोकगुरुः — 91, 15 तपः तेपुः l. तपस्तेपुः — 92, 19 ज्ञ्वलन l. ज्वलन — 94, 7 ऊरु l. ऊरु — 95, 26 विमिर्मित l. विनिर्मित — 98, 15 -नुनपन्नेः l. -नुपपन्नेः — 100, 4 inf. pro C lege B. — 110, 11 inf. pro G l. O — 110, 3 inf. pro s l. si — 127, 12 inf. 20, 27 l. 20, 17 — 128, 9 F 2, 37 l. F 3, 37 — 15 inf. 13, 9 l. 13, 19 — 14 inf. 25, 18 l. 25, 13 — 129, 15 adde: 3, 12 — 4 inf. vlade l. valde — 130, 4 inf. F 2, 25 l. F 1, 25 — 131, 4 inf. F 1, 20 l. F 2, 20 — 132, 15 inf. 23, 21 l. 33, 21 — 1 inf. 8, 14 l. 18, 14 — 133, 1: 43, 6 l. 36, 10 — 134, 7 inf. F 1, 19 l. F 2, 9 — 136, 4: F 1, 2. 2, 7 l. F 1, 7. 2, 1 — 137, 8: F 1, 2 l.

F 2, 3 — 10: 53, 19 l. 33, 19 — 14: F 1, 28 l. F 2, 28 — 15: F 1, 2 l. F 2, 2 — 13 inf. F 3, 1 l. 13, 11 — 138, 14: 30, 11 l. 25, 7 — 139, 10 inf. F 1, 4 l. F 2, 4 — 139, 14 inf. अप्रनाति l. अप्रनोति — 141, 2: 6, 14 l. 6, 16 — 3 inf. F 1, 3 l. 2, 3 — 143, 5 inf. 68 l. 86 — 146, 10: 14, 10 l. 24, 10 — 147, 4: 6, 14 l. 5, 14 — 147, 6: K 73 l. K 72 — 148, 16 inf. K 64 l. K 67 — 14 inf. F 1, 23 l. F 2, 23 — 150, 3 inf. K 14 l. K 24 — 151, 14: 35, 12 l. 34, 12 — 153, 5: 3, 4 l. 2, 21 — 8: 30, 1 l. 30, 11 — 154, 7: 23, 14 l. 23, 4 — 155, 8 inf. 14, 6 l. 15, 4 — 2 inf. 10, 3 l. 10, 13 — 157, 4 inf. 29, 12 l. 29, 18 — 159, 4: 58 l. P 58 — 160, 14: 11, 15; 25, 12 l. 11, 12; 25, 15 — 14 inf. 2, 1 l. 2, 2 — 175, ult. pro r. l. r. 1 — 176, 11: 25, 16 l. 25, 13 — 17: 3, 22 l. 3, 23 — 187, 6 pro 5 l. 8 — 206, 3 inf. वितोत l. विनीत — 242, 11 inf. 5 l. 7 — 9 inf. युत्यते l. युड्यते — 254, ult. अय apparet fere ut अव.

Interdum sub prelo fractae sunt vocales vel signa minora. Animadverti has:

p. 2 v. 1. उपविष्टो — 8, 18 मित्रेण — 12, 10 मरिष्यसि — 17, 13 -दिवसै° — 18, 17 -दन्नो — 26, 13 सेवा — 28, 15 पृष्टः — 31, 14 आरोप्य — 45, 2 प्रोवाच — 48, 9 -भारते — 71, 15 श्री° — 97, 21 -नीमेव — 115, 13 -सर्गस्य — 149, 17 उदक् — 156, 5 inf. कर्ण् — 166, 2 inf. क्रुध् — 205, 11 inf. निर्यास — 217, 17 पृष्ठ — 246, 16 -पुरुष — 253, 12 मासेषु

॥ अथ वेतालपञ्चविंशतौ पूर्वभागः ॥

प्रणम्य शिरसा देवं गणनाथं विनायकं ।
लोकानां च विनोदाय करिष्यामि कथामिमां ॥
प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः सहस्रगुणितैरपि हन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥
केचित्प्राञ्जलमिच्छन्ति केचिद्वक्रं वचो बुधाः ।
केचित्कथां रसस्फीतामतः सर्वं विधीयते ॥

अस्ति दक्षिणापथे जनपदे उज्जयिनी नाम नगरी। तत्र विक्रमादित्यो नाम राजा। कीदृशो राजा।

सूर्यकोटिसमाभासो विद्युज्ज्योतिःसमप्रभः ।
सिंहासनवरे रम्ये मन्त्रिवर्गपुरस्कृतः ॥
कन्दर्प इव रूपाढ्यो हरिवज्जनवल्लभः ।
समुद्र इव मर्यादी समानः सर्वदा सतां ॥
प्रभूतरवितेजस्वी शरच्चन्द्रांशुनिर्मलः ।
नानारत्नयुतो नित्यं नानाधर्मपरायणः ॥
एवमादिगुणैराढ्यो बभूव कुलनन्दनः ।
साधूनां पालनं सम्यग्दुष्टानां संग्रहस्तथा ॥

एवं गुणसमाविष्टो राजा सर्वावसरमास्थान उपविष्टोऽस्ति। अथ कस्मिंश्चिद्दिवसे कुतोऽपि स्थानाच्छान्तिशीलो नाम योगी दिगम्बरो राजसभायां समायातः फलहस्तः सन्। स सभां प्रविश्य राज्ञो हस्ते फलं दत्तवान्। राज्ञासनं दत्तं ताम्बूलं च। स तु क्षणमासने स्थित्वा ततो निजमार्गे गतः। अनया रीत्या राज्ञो हस्ते फलं दत्त्वा प्रत्यहं दर्शनं करोति। एकस्मिन्दिवसे राजहस्तान्मर्कटेन फलं गृहीत्वा भक्षयितुमारब्धं। तन्मध्याद्रत्नमेकं भूमौ निपतितं। तस्य कान्त्या महानुद्द्योतो जातः। तदा राजा साश्चर्यो बभूव। राज्ञोक्तं। भो दिगम्बर महद्रत्नं केन कारणेनानीतं। तदा दिगम्बरेणोक्तं।

रिक्तपाणिर्न पश्येत राजानं भिषजं गुरुं।
दैवज्ञं पुत्रकं मित्त्रं फलेन फलमादिशेत्॥

महाराज ईदृशान्येव महारत्नान्यनेकानि द्वादशवर्षपर्यन्तं तव हस्ते समर्पितानि। तच्छ्रुत्वा भाण्डागारिक आकारितः। भो भाण्डागारिक अनेन दिगम्बरेण दत्तानि यानि फलानि भाण्डागारे क्षिप्तानि तानि गणयित्वानय। भाण्डागारिकस्तानि गृहीत्वा समागतः। प्रत्येकमुत्कृष्य दृष्टानि सर्वाण्यपि रत्नैः पूर्णानि। ततो राजा रत्नसमूहं दृष्ट्वा भणितं। भो दिगम्बर सर्वाणि रत्नानि बहुमूल्यानि किमर्थमानीतानि। एकस्यापि रत्नस्य मौल्यं दातुमसमर्थोऽहं। त्वमतःपरं यदभिलषसि तत्कथय। योगिनोक्तं।

अपि स्वल्पतरं कार्यं यदि स्यात्पृथिवीपतेः ।
सभामध्ये न वक्तव्यं प्रोवाचेदं बृहस्पतिः ॥
सिद्धमन्त्रौषधं धर्मं गृहच्छिद्रं च मैथुनं ।
कुभुक्तं कुत्सितं कर्म मतिमान्न प्रकाशयेत् ॥
षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरो भवेत् ।
द्विकर्णस्य तु मन्त्रस्य ब्रह्माप्यन्तं न गच्छति ॥
गिरिपृष्ठे समारुह्य प्रासादे वा रहो गतः ।
अरण्ये निर्जने देशे तत्र मन्त्रो विधीयते ॥

देव एकान्ते विज्ञापयामि। राज्ञा विजनं कृतं। योगिनोक्तं। देव अस्यां कृष्णचतुर्दश्यां नदीतीरे महाश्मशाने मन्त्रसाधनं करिष्यामि। साधिते सति अष्टौ महासिद्धयो भविष्यन्ति।

अणिमा महिमा चैव लघिमा गरिमा तथा ।
प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्ट सिद्धयः ॥
पुमांस्तु धीरः संपत्तौ भवत्युत्तरसाधकः ।
यस्मादधीरो मन्त्रस्य सिद्धस्यापि विनाशकः ॥
धीरस्तु निस्तरेत्सर्वं धातृशक्तिगुणान्वितः ।
अतोऽहं कर्तुमिच्छामि त्वामेवोत्तरसाधकं ॥

तदर्थं त्वं ममोत्तरसाधको भव। रात्रौ सखड्गेन भवतैकाकिना मत्समीपमागन्तव्यं। तत्प्रतिपन्नं राज्ञा। तदनन्तरं सर्वोपस्करद्रव्याणि गृहीत्वा दिगम्बरश्चतुर्दश्यां महाश्मशानं गतः। राजापि रजन्यां कृष्णवासांसि गृहीत्वा तत्रैव समायातः। सोऽपि राजानं दृष्ट्वा हृष्टरोमा संजातः। यो-

गिनोक्तं। भो राजन्योजनार्द्धे महाश्मशानमस्ति। तत्र शिंशिपावृक्षशाखायां मृतकमवलम्बितमास्ते। तत्र गत्वा मृतकं गृहीत्वा शीघ्रमागच्छ। यदि वदसि तर्हि तन्मृतकं पुनर्वृक्षे यास्यति। तद्वचनमाकर्ण्यासमसाहसिको राजा श्मशानं प्राप्य निःशङ्कः स्थितः। तत्र

पाषाणापस्करयुक्तं श्मशानं भाति भूतले।
मस्तिष्कलितशुभ्रास्थिप्राकारं लोहिताशयं॥
आक्रीडमिव कालस्य कपालचषकाकुलं।
धूमान्धकारमलिनं विहङ्गगणगर्जितं॥

तत्र गत्वा राजा शिंशिपावृक्षमारुह्य छुरिकया पाशं छित्त्वा मृतकं स्कन्धे धृत्वोत्तीर्य मार्गे प्रचलितः। कीदृशं शवं।

नीलजीमूतसंकाशमर्द्धकेशं भयावहं।
वर्तुलाक्षं च निर्मांसं प्रेतमुखविभूषितं॥

मार्गे चलिते सति शवसंस्थेन वेतालेन राजानं प्रत्यभिहितं। भो राजन्

काव्यशास्त्रविनोदेन कालो गच्छति धीमतां।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा॥
विनयेन विना का श्रीः का निशा शशिना विना।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता॥

राजन्श्रूयतां। तावत्कथामेकां कथयामि।

अस्ति वाराणसी नाम नगरी। तत्र प्रतापमुकुटो नाम राजा। तस्य पुत्रो वज्रमुकुटो नाम। स च मन्त्रिपुत्रेण बुद्धि-

सागरेणोद्यानवने दूरमाखेटकं गतः। तत्र सकलं मृगयारसमनुभूय मध्याह्ने द्वौ सरोवरं ददृशतुः।

हंसकारण्डवाकीर्णं चक्रवाकोपशोभितं।
पद्मकिञ्जल्ककह्लारैर्नीलोत्पलैः सितोत्पलैः॥
छादितं पद्मिनीपत्त्रैर्मत्स्यैः कूर्मैर्जलोद्भवैः।
तटैरम्यैर्घनैर्वृक्षैः केतकीखण्डमण्डितं॥
कदलीकुसुमामोदलुब्धषट्पदकूजितं।
जलकुक्कुटकोयष्टिक्रौञ्चसारसशोभितं॥

तत्र तुरंगादवतीर्य हस्तौ पादौ च प्रक्षाल्य तत्समीपे शिवायतनं दृष्ट्वा तत्र गत्वा देवो नमस्कृतः। उक्तं च।

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्ये ऽरण्ये शिव शिव शिवेति प्रलपतः॥

ततो यावद्देवं नमस्कृत्य स राजकुमार उपविशति तावत्तस्मिंस्तडागे स्नानार्थं सखीभिः संवृता नायिका समायाता। तत्र स्नानं कृत्वा गौर्यादीनां पूजां विधाय समन्ततो निरीक्ष्य यावद्गच्छति तावत्तया स राजकुमारो दृष्टः। परस्परं कटाक्षनिरीक्षणं संजातं। शोषणमोहनसंदीपनोच्चाटनोन्मादनैः पञ्चबाणैर्हृदये ताडितः सः। सापि च। तया संकेतस्थानानि कथितानि। मस्तकात्पद्मं गृहीत्वा कर्णे धृतं। कर्णाद्दन्ते धृतं। दन्ताद्धृदये धृतं। हृदयात्पादयोर्धृतं। एवं

विधाय सा निजभवनं गता। स राजकुमारो ऽपि विरहवेदनया पीडितस्तां स्मरञ्जर्जरीभूतशरीरः संजातः। मन्त्रिपुत्रेणोक्तं। भो मित्र केन कारणेन त्वं मूर्छितो ऽसि। तत्कारणं मे निवेदय। राजकुमारेणोक्तं। भो मित्र अस्मिंस्तडागे सखीभिः परिवृता काचिन्नायिका समायाता। यद्येषा मम भार्या भवति तदा जीवामि। नो चेन्मरिष्यामि। इत्येष निश्चयः। मन्त्रिपुत्रेणोक्तं। श्रीमद्भिः किं ज्ञातं। राजपुत्रेणोक्तं। न किंचिज्जानामि। एतदाकर्ण्य मन्त्रिणोक्तं।

उदीरितो ऽर्थः पशुनापि बुध्यते
हयाश्च नागाश्च वहन्ति नोदिताः।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च।
नेत्रवक्त्रविकारैश्च गृह्यते ऽन्तर्गतं मनः॥

त्वया किमपि यत्कृतं तन्ममाग्रे निवेदय। राजकुमारेणोक्तं। अहं कथयामि तस्याश्चेष्टितं। मस्तकात्पद्मं गृहीत्वा कर्णे धृतं। कर्णाद्दन्ते धृतं। दन्ताद्धृदये धृतं। हृदयात्पादयोर्धृतं। एवं विधाय गता सा। मन्त्रिपुत्रेण बुद्धिसागरेणोक्तं। तया पद्मं गृहीत्वा यत्कर्णे धृतं तत्तयेति कथितं। कर्णकुब्जे नगरे वसामि। दन्ते धृतं यत्तत्कथितं। दन्तघातस्य दुहिताहं। हृदये यत्तच्चापि कथितं। त्वमेव प्राणप्रियो मम हृदये वससि। पादयोर्यद्धृतं तत्तयेति कथितं। मम पद्मा-

वती नाम। इति मन्त्रिपुत्रस्य वचनं श्रुत्वा राजकुमारेणोक्तं। यदाहं तां प्राप्नोमि तदा जीवामि। नो चेन्मरिष्यामि। मन्त्रिपुत्रेणोक्तं। यद्येष ते निश्चयो यत्र सा वर्तते तत्र गत्वा भोजनं कर्तव्यं। तस्मादनन्तरं तौ तत्पत्तनं प्राप्तौ। तत्र दूती वसति। तस्या अभिधानं वृद्धा। तद्गृह उत्तीर्णौ। राज्ञा सा पृष्टा। हे वृद्धे त्वं सदास्मिन्नगरे वससि। तयोक्तं सदाहमस्मिन्नगरे वसामि। राजपुत्रेणोक्तं। दन्तघातस्य पुत्री पद्मावती नाम विद्यते। तयोक्तं। तिष्ठति। तस्याः समीपे नित्यमहं गच्छामि। मन्त्रिपुत्रेणोक्तं। अद्य त्वया गन्तव्यं। तयोक्तं। गन्तव्यं। तर्हि राजकुमारेण पुष्पग्रन्थनं कृतं सा चापरकार्ये प्रेषिता। पुनस्तत्कृत्यं विधाय समायाता। पुष्पमालां गृहीत्वा पद्मावतीसमीपे प्रचलिता। तया सह राजपुत्रेण विजन इति कथितं। त्वया पद्मावत्या अग्र इति वक्तव्यं। यो ऽसौ राजकुमारस्त्वया सरोवरे दृष्टः स समायातो वर्तते। तदा गत्वा तया पद्मावत्या अग्रे सर्वं निवेदितं। पद्मावत्यापि पुष्पग्रन्थनादेव तत्परिज्ञातं। पुनश्च मिथ्याकोपं विधाय श्रीखण्डेन हस्तौ विलिप्य तस्याः कपोलौ ताडितौ। कुपिता चेति कथितवती। यदि त्वमीदृशं वचनं ममाग्रे कथयसि तदा घातयामि। इदानीं गच्छ। सा निष्कासिता। आगता सा दुर्मुखी यत्र राजकुमारो ऽस्ति। तस्या मुखमवलोक्य राजकुमारो विषादमगमत्। तया च सर्वं कथितं। राजपुत्रेणोक्तं। मित्र किमेतत्।

मन्त्रिपुत्रेणोक्तं। त्वया विषादो न कार्यः। कारणं विद्यते। चन्दनावलिप्ताभ्यां कराभ्यां यत्सा ताडिता तेन कथितं। दश दिवसाः प्रतीक्ष्या यावत्कृष्णपक्षः समायाति। तदा दशाहे समतिक्रान्ते सा भूयः प्रेषिता। तदा पद्मावत्या तिसृभिरङ्गुलीभिः कुङ्कुमावलिप्ताभिस्तस्याः कपोलौ ताडितौ। निष्कासिता च। तामायान्तीं विलोक्य राजकुमारो विषादं गतः। उक्तं च। किं क्रियते। अद्य मे निश्चयेन मरणं भविष्यति। मन्त्रिपुत्रेणोक्तं। धीरो भव। कारणं विद्यते। देव सांप्रतं सा रजस्वला वर्तते।

प्रथमे ऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी।
तृतीये रजकी प्रोक्ता चतुर्थे ऽहनि शुध्यते॥

चतुर्भिर्दिवसैरतिक्रान्तैर्भूयो ऽपि सा प्रेषिता। पद्मावती च तामागच्छन्तीमवलोक्य रज्जुभिर्बद्धार्द्धचन्द्रं दत्वा पश्चिमद्वारेण निष्कासितवती। आगता सा दुर्मुखी भूत्वा सर्वं वृत्तान्तं कथितवती। मन्त्रिपुत्रेण विचार्य कथितं। देव अर्द्धरात्रे पश्चिमद्वारेण तस्याः समीपे गन्तव्यं। तच्छ्रुत्वा राजकुमारस्य तद्दिनं वर्षशताधिकमिव जगाम। ततश्च रात्रौ शृङ्गारं विधाय मित्त्रेण सह पश्चिमद्वारे गतः। ततश्च दृढरज्जुभिराकृष्य चेटिकाभिर्भवनोपरि नीतः। मन्त्रिपुत्रो व्यावृत्य स्ववासं गतः। तस्य राजकुमारस्य पद्मावत्या दर्शनं संजातं। संभाषणं कुशलप्रश्नश्च संबभूव। स्नानं भोजनं वस्त्रादिभूषणं सुगन्धादिलेपनं ताम्बूलं गृहीत्वा

सुखशय्यायामुपविष्टः। तया सह नानाप्रकारैः सुरतसंभोगं विधाय राजकुमार उपविष्टः संस्तया पृष्टः। भो देव ममाभिप्रायो भवता मन्त्रिणा वा ज्ञातः। राजकुमारेणोक्तं। मया न ज्ञातं किंचित्। मम मन्त्रिपुत्रेण सर्वं ज्ञातं। तयोक्तं। तुष्टाहं तव मित्त्रस्य। प्रातश्चूर्णिकां करिष्यामि। तत्प्रभाते राजकुमारेण मित्त्रसमीपे गत्वा सर्वो वृत्तान्तो निवेदितः। उक्तं च।

दराति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।
भुनक्ति भुञ्जापयति षड्विधं प्रीतिलक्षणं॥

भो मित्त्र तव कुले मध्याह्ने भोजनं समागमिष्यति। तच्छ्रुत्वा मन्त्रिपुत्रेण भणितं। देव मम योग्यविषलड्डुकाः समागमिष्यन्ति। यावदेतद्वर्तते तावद्विषलड्डुकान्गृहीत्वा चेटिका समायाता। तानवलोक्य लड्डुकमेकं शुनोऽग्रे निक्षिप्तं। भक्षितमात्रेण मृतः श्वा। श्वानं मृतं दृष्ट्वा स राजकुमारः कुपित उवाच। तया सह संगमं न करिष्यामि। मम मित्त्रस्य घातकीयं। मित्त्रेणोक्तं। त्वं मा सदः। तदेव स्नेहकारणं तस्याः।

जननी जन्मस्थानं बान्धवलोकं वसूनि जीवं च।
पुरुषविशेषासक्ताः सीमन्तिन्यस्तृणाय मन्यन्ते॥

उक्तं च।

यस्य वान्नानि भुञ्जीत गृहे वाप्युषितं तथा।
कर्मणा मनसा वाचा हितं तस्य समाचरेत्॥

क्षीरनीरसमं मित्रं प्रशंसन्ति विचक्षणाः ।
नीरं क्षीरयते तत्र वह्नौ दह्यति तत्पयः ॥

किं बहुना । मम भाषितं कर्तव्यं । भो देव अद्य निशीथसमये सुरतसौख्यमनुभूय परं तीक्ष्णनखाग्रैर्वामजङ्घायां त्रिशूलाघाताकृतिं विधाय तस्या वस्त्राभरणानि गृहीत्वा मम समीप आगन्तव्यं त्वया । मन्त्रिपुत्रो महाश्मशाने गत्वा तपस्विविशेषं विधाय स्थितः ॥

जटामुकुटधारी च चन्द्रार्द्धकृतशेखरः ।
बद्धपद्मासनो मौनी ईषन्मीलितलोचनः ॥

ततस्तत्प्रभाते राजपुत्रेण तस्या वामजङ्घायां त्रिशूलाकृतिं विधाय सर्ववस्त्राभरणानि गृहीत्वा मन्त्रिपुत्रस्याग्रे समर्पितानि । मन्त्रिपुत्रेण तस्या अङ्गुलीयकं दत्त्वा राजकुमारो हट्टे विक्रेतुं प्रेषितः । तेन तत्र गत्वा कनककाराणामग्रे दर्शितं तैरुपलक्षितं । राजदुहितुराभरणमिदं कुतो लब्धं । तैर्गत्वा कोष्ठपालस्याग्रे कथितं । धृतोऽसौ कोष्ठपालेन भणितं च । भो शस्त्रपाणे कुतो लब्धमिदमाभरणं । तेनोक्तं । मदीयगुरुणा दत्तं । तच्छ्रुत्वा गुरुसंनिधौ नीतः । कोष्ठपालेन गुरुः पृष्टः । भो तापस कुतो लब्धमिदं राजकीयनामाङ्कितमाभरणं । भट्टारकेणोक्तं । अत्र कृष्णचतुर्दश्यां रक्तपुष्पैर्मण्डलं कृत्वा पूजयित्वा योगिन्यः पुरुषमेकं विदार्य भागं कृत्वा यावद्भक्षयन्ति तावन्मया दृष्टाः । त्रिशूलं गृहीत्वा प्रधावितोऽहं । ततो मदीयं क्रोधवचनमाकर्ण्य दश-

दिशि प्रधाविताः। तासां मध्य एका वामजङ्घायां त्रिशूलेन ताडिता। भयवशाद्वस्त्राभरणानि पतितानि। तदा मया गृहीतानि। तद्वचनमाकर्ण्य कोष्ठपालेन राजाग्रे सर्वो वृत्तान्तो निवेदितः। तत्सर्वं श्रुत्वा राजा चेटिकाग्रे भणितवान्। त्वया पद्मावतीं विवस्त्रां कृत्वा वामजङ्घायां लक्षणमवलोकितव्यं। राजादेशेन तत्र गत्वा पद्मावतीं विलोक्य लक्षणं दृष्ट्वा राजाग्रे भणितं। भो देव कोष्ठपालेन भणितं तत्सत्यमेव। उक्तं च।

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च।
गृञ्जनं चापमानं च मतिमान्न प्रकाशयेत्॥

राज्ञोक्तं। भो कोष्ठपाल पुनरपि गत्वा तं मुनीन्द्रं पृच्छ। को ऽस्या दण्डः क्रियते। कोष्ठपालेन गत्वा भट्टारकः पृष्टः। भो भगवन्को ऽस्या दण्डः क्रियते। भट्टारकेणोक्तं।

अवध्या ब्राह्मणा गावः स्त्रियो बालाश्च ज्ञातयः।
येषां चान्नानि भुञ्जीत ये च स्युः शरणं गताः॥

महत्यपराधे ऽपि स्त्रीणां विसर्जनं दण्डः। ततो भूमिनाथेनापरीक्षितेन पद्मावती निजनगरान्निष्कासिता। तदा ताभ्यां तां हयपृष्ठमारोप्य स्वनगरीं गत्वा कुमारेण सह विवाहः कृतः। उक्तं च।

सुगुप्तस्यापि दम्भस्य ब्रह्माप्यन्तं न गच्छति।
कौलिको विष्णुरूपेण भजते राजकन्यकां॥
अपरीक्षितं न कर्तव्यं कर्तव्यं सुपरीक्षितं।

पश्चाद्भवति संतापो ब्राह्मण्या नकुलाद्यथा ॥
कृतान्तविहितं कर्म यद्भवेत्पूर्वनिर्मितं ।
न शक्यमन्यथा कर्तुं पण्डितैस्त्रिदशैरपि ॥
रामो हेममृगं न वेत्ति नहुषो नो यान्युनक्ति द्विजा-
न्विप्रादेव सवत्सधेनुहरणे जाता मतिश्चार्जुने ।
द्यूते भ्रातृचतुष्टयस्वमहिषीं धर्मात्मजो दत्तवा-
न्प्रायः सत्पुरुषो विनाशसमये बुद्ध्या परित्यज्यते ॥

एतत्कथानकं कथयित्वा वेतालेनोक्तं । राजन्कथय कस्य पापं भवति । यदि जानन्नपि न कथयिष्यसि तदा हृदये स्फुटित्वा मरिष्यसि । राज्ञा विक्रमसेनेनोक्तं । अविचारेण नृपस्य पापं भवति । एवं श्रुत्वा गतो वेतालः । गत्वा च तत्रैव शिंशिपावृक्षस्य शाखायामवलम्बितः ॥

इति शिवदासविरचितायां वेतालपञ्चविंशतिकायां
कथायां प्रथमं कथानकं समाप्तं ॥ १ ॥

---

अथ राजा पुनरपि तत्रैव गत्वा मृतकं स्कन्धे धृत्वा यावन्मार्गे प्रचलितस्तावत्तेन कथानकं प्रारब्धं । वेतालेनोक्तं । भो राजन्श्रूयतां तावत्कथेयं । अस्ति धर्मस्थलं नाम नगरं । तत्र राजा गुणाधिपो नाम । तत्रैव च केशवो नाम ब्राह्मणोऽस्ति । तस्य दुहिता मन्दारवती नाम रूपेणातीव विख्याता । सा च वरयोग्याभवत् । तस्या अर्थे च-

त्वारो वराः समायाताः। चत्वारोऽपि समानगुणा ब्राह्मणाः। केशवश्चिन्तां प्रपन्नो बभूव। एका कन्या चत्वारो वराः। कस्मै देया कस्मै न देया। एतस्मिन्नेव प्रस्तावे केशवस्य दुहिता कालसर्पेण दंशिता। तदर्थे मन्त्रवादिनः समानीताः। तैर्मन्त्रवादिभिस्तां विलोक्य भणितं। कालदष्टा न जीवति कन्येयं।

यतः। पञ्चमी नवमी षष्ठी चतुर्दश्यष्टमी तथा।
तिथयो गर्हिता ह्येता दष्टस्य मरणात्मकाः॥
भौमं शनैश्चरं चैव ग्रहाणां ग्रहसंज्ञितं।
अप्रशस्तं नागदष्टस्य निर्दिष्टं शास्त्रकोविदैः॥
रोहिणीं च मृगाश्लेषां विशाखामूलकृत्तिकाः।
आतुरस्याशुभान्याहुरार्द्रानक्षत्रसप्तमे॥
इन्द्रियेष्वोष्ठयोः शङ्खे चिबुके गण्डमण्डले।
कण्ठे ललाटे शिरसि बाह्वोर्जानूरुयुग्मके॥
हृन्नाभिस्कन्धजठरे कक्षायां मर्मसन्धिषु।
तथा पाण्यंघ्रिमध्येषु दष्टः यो स न जीवति॥
जीर्णोद्याने श्मशाने च चैत्ये च धवले गृहे।
एषु क्षेत्रेषु ये दष्टा यान्ति ते यमसादनं॥
दाहः स्वेदश्च वमनं हिक्का शूलाङ्गजृम्भणं।
भ्रमणं भानुनाशश्च कालदष्टस्य चेष्टितं॥

ततो मन्त्रिकवचनं श्रुत्वा तदनन्तरं ब्राह्मणः केशवो नदीतीरे गत्वा तस्याः संस्कारं चकार। चत्वारोऽपि वराः

श्मशाने समायाताः। तेषां मध्ये एकश्चितायां प्रविश्य मृतः। द्वितीयेन तस्या अस्थीनि तद्भस्म च श्मशाने कुटी-रकं कृत्वा रक्षितानि। तृतीयस्तपस्वी भूत्वा देशान्तरं गतः। तुर्यो निजभवनं गतः। यो देशान्तरं गतस्तेन देशान्तरे कस्यचिद्ब्राह्मणस्य गृहे गत्वा मध्याह्ने भोजनं प्रार्थितं। गृह-स्थेन ब्राह्मणेन भणितं। भो तपस्विंस्त्वयात्रैव भोजनं कार्यं। तावद्ब्राह्मण्या भोजनं निष्पादितं आसनं च दत्त्वो-पवेशितः सः। तावत्तस्या बालकेन गृहे रोदितुमारब्धं। गृहस्थया ब्राह्मण्या स बालो ज्वलिताग्नौ प्रक्षिप्तः। तद्दृष्ट्वा तेन भिक्षुणा चलितं। तेन ब्राह्मणेन स तु निवारितः। तेन भणितं। तद्दारुणं कर्म दृष्ट्वा सद्भोजनं न करोमि। यस्य गृह ईदृशं राक्षसं कर्म दृश्यते तस्य गृहे कथं भोजनं करणीयं। तच्छ्रुत्वा तेन गृहस्थेन ब्राह्मणेन गृहमध्ये प्रविश्य पुस्तकमानीतं। तदुद्घाट्य मन्त्रमेकं जपित्वा बाल-को भस्मीभूतो जीवापितः। तपस्विना ब्राह्मणस्य कौतुकं दृष्ट्वा चिन्तितं च। यदि मम हस्ते पुस्तकोऽयं घटति तदाहं तां प्रियां जीवापयामि। इति संचिन्त्य तत्रैव निभृतो भूत्वा स्थितः। निशीथे गृहमध्ये प्रविश्य तत्पुस्तकमपहृत्य तत्रैव श्मशाने समायातः। यः श्मशाने तिष्ठति तेन पृष्टः। भो मित्र देशान्तरे गत्वा कश्चिद्विद्या समाज्ञाता। तेनोक्तं। मृतसंजीवनी विद्या मया समाज्ञाता। द्वितीयेनोक्तं। तर्हि-मां प्रियां जीवापय। तच्छ्रुत्वा तेन पुस्तकमुद्घाट्य मन्त्रमेकं

जपित्वा जलेन सिक्त्वा जीवापिता कन्या। यः सहैव मृतः सो ऽपि जीवितः। यो गृहे गतस्तेन श्रुत्वायातमपि। तस्या अर्थे क्रोधान्धलोचनाश्चत्वारो ऽपि प्रविवादं कुर्वन्ति ॥

एतत्कथानकं कथयित्वा वेतालेनोक्तं। भो राजन्कथय कस्य भार्या भवति। राज्ञा विक्रमसेनेनोक्तं। श्रूयतां।

येन जीवापिता कन्या स पिता जीवदायकः।
यः सहैव मृतः सो ऽपि भ्राता याति सहैव यः ॥
भस्मसंग्रहणं कृत्वा श्मशाने येन संस्थितं।
नीचकर्मा स दासः स्यात्स भर्ता यो गृहे गतः ॥

एवं श्रुत्वा गतो वेतालस्तत्रैव शिंशिपावृक्षशाखायामवलम्बितः ॥

इति द्वितीयं कथानकं समाप्तं ॥ २ ॥

---

अथ राजा पुनस्तत्रैव गत्वा मृतकं स्कन्धे धृत्वा यावन्मार्गे प्रचलितस्तावत्तेन कथानकं प्रारब्धं। वेतालेनोक्तं। भो राजन्श्रूयतां। तावत्कथां कथयामि ॥

अस्ति भोगवती नाम नगरी। तत्र रूपसेनो नाम राजा। तस्य धवलगृहे विदग्धचूडामणिर्नाम कीरो ऽस्ति। स च राज्ञा पृष्टः। भो शुक किं किं जानासि। [तेनोक्तं]। देव सर्वविवादं जानामि। राज्ञोक्तं। यदि जानासि तर्हि कथय। ममानुरूपा भार्या क्वचिदस्ति। शुकेनोक्तं। देव

मगधदेशे मगधेश्वरो नाम राजा। तस्य दुहिता सुरसुन्दरी नाम। सा तव भार्या भविष्यति। मगधेश्वरस्य दुहिता निजभवने स्थिता सती मदनमञ्जरीं नाम शारिकां पृच्छति स्म। शारिके कथय। ममानुरूपो भर्ता क्वास्ति। शारिकयोक्तं। देवि भोगवती नाम नगरी। तत्र रूपसेनो नाम राजा। स तव भर्ता भविष्यति। तच्छ्रुत्वा विरहपीडिता संजाता॥

यावदेतद्वर्तते तावद्रूपसेनस्य विशिष्टा मगधेश्वरपार्श्वे दुहितृयाचनाय समायाताः। सान्धिविग्रहिकेण यथावसरं राज्ञा सह दर्शनं कारितं। तैर्विशिष्टैर्दुहिता याचिता लब्धा च। तदा शुभे लग्ने रूपसेनेनागत्य परिणीता। मदनमञ्जर्या शारिकया सह निजराष्ट्रे समायाता। राज्ञा रूपसेनेन शारिका विदग्धचूडामणिशुकस्य पञ्जरे निक्षिप्ता। तां शारिकां स्वरूपां दृष्ट्वा शुकेन मदनातुरेण भणितं। हे प्रिये चञ्चले यौवने संभोगः क्रियतां। संसारे सर्वजन्तूनामेतदेव सारं।

श्रेयः पुष्पफलं काष्ठाद्दुग्धाच्छ्रेयो घृतं स्मृतं।
श्रेयस्तैलं च पिण्याकात्कामो धर्मार्थयोर्वरं॥
गतं तद्यौवनं भीरु जीवितं च निरर्थकं।
या न वेत्ति सदा पुंसां चतुराणां रतिक्रमं॥

शारिकयोक्तं। नाहं पुरुषस्य वाञ्छां करोमि। शुकेनोक्तं। कस्मात्कारणात्। शारिकयोक्तं। पुरुषाः पापिष्ठाः स्त्री-

घातका भवन्ति। शुकेनोक्तं। स्त्रियो ऽपि दुष्टचारिण्यो ऽनृतभाषिण्यः पुरुषवधं कुर्वन्ति।

अनृतं साहसं माया मूर्खत्वमतिलोभता।
अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः॥

एतयोः परस्परविवादं श्रुत्वा राज्ञा भणितं। भो कथ्यतां विवादकारणं। शारिकयोक्तं। देव पुरुषाः पापिष्ठाः स्त्रीघातका भवन्तिः। अतः कारणात्पुरुषस्य वाञ्छामहं न करोमि। देव अस्यार्थे कथानकमस्ति॥

एलपुरं नाम नगरं। तत्र महाधनो नाम श्रेष्ठी। तस्य पुत्रो धनञ्जयो नाम। तेन च पुण्यवर्धने नाम नगरे श्रेष्ठिदुहिता परिणीता। कालपर्यायेण तस्य पिता पञ्चत्वं गतः। तेन धनञ्जयेण सर्वं धनं भवनं च द्यूते हारितं। स च श्वशुरगृहे भार्यामुत्कलापनाय गतः। कतिपयदिवसैस्तत्र स्थित्वा साभरणां भार्यामुत्कलाप्य निजनगरमार्गे प्रचलितः। यावदर्द्धे मार्गे गच्छति तावत्कथितं। हे प्रिये अत्र महाभयं विद्यते। निजाभरणान्युत्तार्य मे देहि। तयाभरणान्युत्तार्य पुरुषे समर्पितानि। तेन च तस्या आभरणानि वस्त्रं च गृहीत्वान्धकूपे पातिता गतश्च सः। कैश्चित्पथिकैस्तच्छब्दमाकर्ण्य कूपसमीपं गत्वा रुदतीं दृष्ट्वा कूपादाकृष्य मार्गे मुक्ता। सा च मार्गे लग्ना सती पितुर्गृहे समायाता। बान्धवादिभिः पृष्टा। कस्मात्त्वं व्याघुटिता। तयोक्तं। मम भर्ता मार्गे चौरैर्बद्धः। ममाभरणानि च

तैर्गृहीतानि। तत्प्रनष्टाहं। भर्तुः शुद्धिं न जानामि। व्यापादितो वा भविष्यति। तद्वचनमाकर्ण्य श्वशुरकेण शोकं कृत्वा दुहिताश्वासिता। कतिपयदिवसैरतिक्रान्तैः पुनरपि धनक्षयः श्वशुरगृहे समायातः। यावद्द्वारे गछति तावन्निजभार्यया दृष्टः। तां दृष्ट्वा शङ्कितो बभूव। एषा मया कूपे पातिता कथमत्र दृश्यते। भयचकितापन्नो बभूव। भार्ययोक्तं। स्वामिन्मा भयं कुरु। इति कथयित्वा गृहमध्ये नीतः। श्वशुरकुटुम्बं सर्वं सोत्साहं बभूव। वर्धापनं च कृतं। कतिपयदिवसैस्तत्र स्थित्वा प्रसुप्तां भार्यां शयने व्यापाद्य तस्या आभरणानि गृहीत्वा स्वनगरे गतः॥ हे राजन्नेतत्प्रत्यक्षं मया दृष्टं। सर्वथा पुरुषैर्नास्ति प्रयोजनं॥ शुकेनोक्तं।

वाजिवारणलोहानां काष्ठपाषाणवाससां।
नारीपुरुषतोयानामन्तरं महदन्तरं॥

इति श्रुत्वा राज्ञा विदग्धचूडामणिः पृष्टः। भो शुक स्त्रीणां दोषान्कथय। शुकेनोक्तं। श्रूयतां महाराज।

अस्ति काञ्चनपुरनामधेयं नगरं। तत्र सागरदत्तो नाम श्रेष्ठी। तस्य पुत्रः श्रीदत्तो नाम। तेन च श्रीपुरनगरे श्रेष्ठिनः समुद्रदत्तस्य दुहिता परिणीता। तां विवाह्य स्वनगरे समायातः। कतिपयदिवसाभ्यन्तरे व्यावृत्य सा पितुर्गृहे प्रेषिता। स च श्रीदत्तः क्रयाणकानि वसूनि गृहीत्वा बाणिज्ये समुद्रपारं गतः। तत्र कानिचिद्वासराणि

लग्नानि। सा च पितुर्गृहे वर्धमाना सती यौवनवती बभूव। उक्तं च।

यौवनमुदयकाले विदधाति विरूपके ऽपि लावण्यं।
दर्शयति पक्वसमयो निम्बफलस्यापि माधुर्यं॥

सापि भवनोपरि स्थिता सती राजमार्गावलोकनं करोति। एकस्मिन्दिवसे युवा पुरुष एको दृष्टः। परस्परं कटाक्षनिरीक्षणं संजातं। तया निजसख्या अग्रे कथितं। पुरुषमेतं मम समीपमानय। इति श्रुत्वा तया तस्य समीपे गत्वा भणितं। पुरुष हे मन्मथावतार श्रेष्ठिसमुद्रदत्तस्य तनया त्वया सहैकान्तं वाञ्छति। प्रतिपन्नं तेन। रात्रौ तव गृह आगमिष्यामि। मालाकारीसखीगृहे द्वाभ्यां संघट्टनं कृतं। परस्परं प्रीतिरुत्पन्ना। अन्येद्युः परिणीतभर्ता भार्यामुत्कलापनाय श्वशुरगृहे समायातः। भर्तारमागतं दृष्ट्वा सा चिन्तापन्ना बभूव।

किं करोमि क्व गच्छामि को मां धारयितुं क्षमः।
न बुभुक्षा न तृष्णा मे शीतोष्णं न च रोचते॥

सर्वं सख्या अग्रे कथितं।

अतिगोष्ठीनिरङ्कुशत्वं भर्तुः स्वैरता पुरुषैः सह निर्यन्त्रणता प्रवासे ऽवस्थानं विदेशवासश्च पत्युरुपघातः स्वैरिणीसंसर्ग ईर्ष्यालुता चेति स्त्रीणां विनाशकराणि॥

यामातृको त्रैकालिकं शयनीयवासे प्रसुप्तः। सापि मात्रा

बलात्कारेण पत्युः समीपे प्रेषिता। सा तत्र गत्वा पराङ्मुखी भूत्वा प्रसुप्ता। यथा यथा भर्ता तया सह स्नेहवचनानि वदति तथा तथाधिकं दुःखं भवति। एवं पराङ्मुखी भूत्वा शयने स्थिता।

रागी न लभते निद्रां पट्टतल्पमुपस्थितः।
वीतरागः सुखं शेते दृषदि कण्टकेष्वपि॥

इत्थं भर्तारं निद्रावशं ज्ञात्वा शनैः शनैः शयनादुत्थाय संकेतस्थानं निशीथसमये चलिता। यावच्च व्रजति तावच्चौरेण दृष्टा चिन्तितं च। एषा साभरणा कुत्र गच्छति। इति पृष्ठतो लग्नः। यतः।

पतिं त्यक्त्वा तु या नारी गृहादन्यत्र गच्छति।
विटेषु रमते नित्यं स्वैरिणीं तां विनिर्दिशेत्॥
अहरहरनुरागाद्दूतिकां प्रेष्य पूर्वं
सरभसमभिधाय क्वापि संकेतनं च।
न मिलति खलु यस्या वल्लभो दैवयोगा-
त्कथयति भरतस्तां नायिकां विप्रलब्धां॥
या दूतिकागमनकालमपारयन्ती
स्त्री दुःसहस्मरज्वरार्त्तिपिपासितेव।
निर्याति वल्लभजनाधरपानलोभा-
त्सा कथ्यते मुनिवरैरभिसारिकेति॥

सो ऽपि तस्याः प्रियः संकेतस्थाने कालसर्पेण व्यापादितो ऽस्ति।

संगमविरहवितर्के वरमिह विरहो न संगमस्तस्याः ।
सङ्गे सा पुनरेका त्रिभुवनमपि तन्मयं विरहे ॥

सापि विरहेण पीडिता सती मृतकमालिङ्गनं करोति। मृतो ऽयमिति न वेत्ति। विलेपनताम्बूलादिकं दत्तं। पुनः पुनः स्नेहान्मुखं चुम्बति। चौरो ऽपि दूरस्थो ऽपि सर्वं वृत्तान्तं पश्यति। चिन्तितं च ॥

यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनो ऽन्यसक्तः ।
अस्मत्कृते ऽपि परितप्यति काचिदन्या
धिक्तां च तं च मदनं च इमां च मां च ॥

यावदेतद्वर्तते तावत्तत्रस्थितेन वटवृक्षाधिरूढेन यक्षेण चिन्तितं। अहमस्य मृतकस्य शरीरे संक्रमणं विधाय तया सह संभोगं करिष्यामि। संभोगं कृत्वा तस्या नासिकां दन्तैश्छित्त्वा स यक्षो गतः। सा रुधिरचर्चितसर्वाङ्गी सख्याः समीपे गत्वा सर्वं वृत्तान्तं कथितवती। सख्योक्तं। यावदादित्योदयो न भवति तावत्परिणीतभर्तुः समीपं गत्वा गुरुतरशब्देन रोदितव्यं। इति श्रुत्वा तदा तत्र गत्वा गुरुतरशब्देन रोदितुमारब्धं। तच्छब्दमाकर्ण्य कुटुम्बलोकः प्रधावितो यावत्पश्यति तावच्छिन्ननासिका दृष्टा। तैरुक्तं। हे निर्लज्ज पापिष्ठ हे क्रूरकर्मन्निरपराधतया त्वयास्माकं दुहितुर्नासिकाछेदः कथं कृतः किमिति विहितः। यामातृकश्चिन्तापन्नो बभूव। तेनोक्तं।

विश्वसेत्कृष्णसर्पस्य खड्गहस्तस्य वैरिणः ।
अवार्यबलवित्तस्य स्त्रीचरित्रे न विश्वसेत् ॥

कवयः किं न पश्यन्ति किं न भक्षन्ति वायसाः ।
मद्यपाः किं न जल्पन्ति किं न कुर्वन्ति योषितः ॥

अश्वप्लुतं माधवगर्जितं च स्त्रीणां चरित्रं भवितव्यतां च
अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो मनुष्यः

तैराजकुले गत्वा यामातृकः समर्पितः। राजपुरुषैर्न्यायः कृतः। वध्यो ऽयं पुरुषः। यावद्वध्यस्थाने नीयते तावच्चौरः समायाति। भणितं च। भो राजपुरुषा अवध्यो ऽयं पुरुष इति सर्वं प्राग्वृत्तान्तं तेषामग्रे कथितवान्। धर्माधिकारिपुरुषैर्यथाकार्यं विचार्य यामातृको मुक्तः।

साधूनां पालनं सम्यग्दुष्टानां निग्रहस्तथा ।
एष राज्ञां परो धर्मः परत्रेह च शर्मणे ॥

प्रजानां रक्षणं सम्यग्राज्ञो धर्मस्य कारणं ।
अरक्षन्नरकं याति तस्माद्रक्ष्याः सदा प्रजाः ॥

सापि गर्दभमारुह्य निजनगरान्निष्कासिता ॥

एतत्कथानकं कथयित्वा विदग्धचूडामणिशुकेनोक्तं। देव ईदृशी नारी भवति ॥

ततस्तौ तु परित्यज्य पक्षिभावमुभावपि ।
दिव्यरूपधरौ भूत्वा जग्मतुस्त्रिदशालयं ॥

एतत्कथानकं कथयित्वा वेतालेनोक्तं। राजन्कथय कस्याधिकं पापं भविष्यति। राज्ञो विक्रमसेनेनोक्तं।

निन्द्या योषित एवेह न पुमांसः कदाचन ।
धर्माधर्मविचारेषु नियुक्तास्ते भवन्ति यत् ॥

पापमधिकं स्त्रीषु वर्तते पुरुषस्तु विरलपातको भवति। एवं श्रुत्वा गतो वेतालः। तत्र च शिंशिपावृक्षशाखायामवलम्बितः ॥

इति तृतीयं कथानकं समाप्तं ॥ ३ ॥

---

पुनस्तेन राज्ञा शिंशिपावृक्षान्मृतकं समानीय स्कन्धे धृत्वा यावन्मार्गे चलितं तावद्वेतालेनोक्तं। राजन्श्रूयतां। तावत्कथां कथयामि ॥

अस्ति वर्धमाना नाम नगरी। तत्र राजा शूद्रकदेवः। स चास्थानभूमौ निविष्टः। राज्ञोक्तं। भो प्रतीहार द्वारं शून्यमशून्यं वा। प्रतीहारेणोक्तं।

प्रस्वेदमलसंश्लिष्टा निरालम्बा निराश्रयाः।
द्वारि तिष्ठन्ति देवेश सेवका वृषणा इव ॥

अन्यस्मिन्दिवसे दक्षिणापथाद्वीरवरो नाम राजपुत्रः सेवां कर्तुं समायातः। राज्ञा सह दर्शनं जातं। स च राज्ञा पृष्टः। भो राजपुत्र दिनं प्रति तव किं दीयते। वीरवरेणोक्तं। देव प्रतिदिनं सुवर्णसहस्रमेकं दीयते। राज्ञोक्तं। कियन्तो गजतुरगपदातयः। वीरवरेणोक्तं। देव भार्या सुतौ दुहिताहं चत्वार एव। पञ्चमः खड्गः। अन्यन्नास्ति। तच्छ्रुत्वा सुभटा

अमात्याश्च सेर्ष्याः संजाताः। राज्ञा चिन्तितं। किमर्थमसौ बहुतरं याचते। अथवा बहु दत्तं कदाचित्सफलं भवति। राज्ञा भाण्डागारिकमाहूयादेशं दत्तवान्। तस्य वीरवरस्य टङ्कसहस्रसुवर्णं प्रतिदिनं दातव्यं। वीरवरो ऽपि देवब्राह्मणभट्टनागरप्रेष्यपङ्गुदर्शनादीनां दानं दत्त्वा पञ्च द्रव्याणि गृहीत्वा गृहं समागच्छति। भोजनं विधाय रात्रौ खड्गं गृहीत्वा राजद्वारे प्रहरकं ददाति। एवं नित्यं निशीथसमये यदा राजैवं वदति द्वारे कस्तिष्ठति तदा वीरवरः शब्दं ददाति॥ उक्तं च।

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनो ऽर्थिभिः॥
आहारयति न स्वस्थो विनिद्रो न प्रबुध्यते।
वक्ति न स्वेच्छया किंचित्सेवकः किंतु जीवति॥
स्वाभिप्रायपरोक्षस्य परचित्तानुवर्तिनः।
स्वयंविक्रीतदेहस्य सेवकस्य कुतः सुखं॥
मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः।
धृष्टः पार्श्वे वसति विचरन्दूरतो ऽपि प्रमत्तः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः॥

अन्यस्मिन्दिने निशीथे श्मशानभूमौ रुदत्या नार्याः करुणाविलापशब्दं शृणोति स्म राजा। तं श्रुत्वा राज्ञोक्तं। द्वारे कस्तिष्ठति। वीरवरेणोक्तं। देव वीरवरो ऽहं। राज्ञोक्तं।

वीरवर रुदत्या नार्याः शब्दं शृणोषि। तेनोक्तं। शृणोमि। राज्ञोक्तं। अस्याः समीपं गत्वा रोदनकारणं विज्ञाय शीघ्रमागच्छ। उक्तं च।

जानीयात्प्रेषणे भृत्यान्बान्धवान्व्यसनागमे।
मित्रमापत्तिकाले च भार्यां च विभवक्षये॥

ततो वीरवरः शब्दानुलग्नः श्मशानभूमिं गतः।

अलक्ष्येण स्वरूपेण तिमिरव्याप्तवर्त्मना।
शूद्रको ऽपि महीपालस्तस्य चानुपदं ययौ॥

तत्र प्रच्छन्नो भूत्वा तत्पृष्ठतो राजापि गतवान्। तत्र च दिव्याभरणभूषिता मुक्तकेशा रुदती नारी दृष्टा।

नृत्यते कूर्दते चैव धावते चलते तथा।
रुदती चाश्रुहीना च करुणं चातिदुःखिता॥
अहो दुःखी च पापात्मा धुनोत्यङ्गं मुहुर्मुहुः।
आस्फोटयति गात्राणि चोत्पत्य पतते भुवि॥

तां दृष्ट्वा वीरवरेणोक्तं। का त्वमत्र प्रलापं करोषि। तयोक्तं। अहं राजलक्ष्मीः। वीरवरेणोक्तं। यदि त्वं राजलक्ष्मीस्तदा केन कारणेन रोदनमारब्धं। तयोक्तं। अस्ति को ऽप्यपायो येन देव्याः प्रकोपः कृतः। तेन तृतीयदिवसे राजायं पञ्चत्वं गमिष्यति। अहं चानाथा भविष्यामि। तेन दुःखेन रोदिमि। वीरवरेणोक्तं। अस्ति को ऽप्युपायो येन शतायुर्भवति। तयोक्तं। राजकीयभट्टारिकायाः पुरतो यदि त्वं निजपुत्रस्य मस्तकं स्वहस्तेन छित्त्वा बलिं ददासि तदा

राजा शतायुर्भवति। एवं श्रुत्वा वीरवरो ऽपि निजगृहं गतः। तत्र च तेन प्रसुप्तां भार्यामुत्थाप्य सर्वो वृत्तान्तः कथितः॥ यतः।

ते पुत्रा ये पितुर्भक्ताः स पिता यस्तु पोषकः।
तन्मित्रं यत्र विश्वासः सा भार्या यत्र निर्वृतिः॥

वश्यश्च पुत्रो ऽर्थकरी च विद्या
अरोगिता मित्रसमागमश्च।
भार्या विनीता प्रियवादिनी च
शोकस्य मूलोद्धरणानि पञ्च॥

अविनीतो भृत्यजनो नृपतिरदाता शठानि मित्राणि।
अविनयवती च भार्या मस्तकशूलानि चत्वारि॥

कान्तावियोगः स्वजनापरागो
द्रव्यस्य शेषः कुजनस्य सेवा।
दरिद्रभावाद्विमुखं च मित्रं
विनाग्निना पञ्च दहन्ति कायं॥

सुहृदि निरन्तरचित्ते गुणवति भृत्ये प्रियासु नारीषु।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति॥

किं बहुनात्र।

अहं मृत्युवशं प्राप्तो राजार्थे नात्र संशयः।
पितृभ्रात्राश्रमे भद्रे गच्छ त्वं वरवर्णिनि॥

एतच्छ्रुत्वा भार्यया भणितं।

मितं ददाति हि पिता मितं भ्राता मितं सुतः।

अमितस्य तु दातारं भर्तारं का न पूजयेत् ॥
न च पुत्रेण मे कार्यं स्वजनैर्नापि बान्धवैः ।
न पित्रा नैव मात्रा च त्वं हि स्वामिन्गतिर्मम ॥
न त्यजामि त्वत्समीपमहं स्वामिन्पतिव्रता ।
भर्ता वै ह्याश्रयः स्त्रीणामेष धर्मः सनातनः ॥
न दानैः शुध्यते नारी नोपवासशतैरपि ।
अव्रतापि भवेच्छुद्धा भर्तृतद्गतमानसा ॥
अन्धकं कुब्जकं चैव कुष्ठाङ्गं व्याधिपीडितं ।
आपद्गतं च भर्तारं न त्यजेत्सा महासती ॥
एष धर्मो मयाख्यातो नारीणां चोत्तमा गतिः ।
या नारी कुरुते चान्यत्सा याति नरकं ध्रुवं ॥

एवं श्रुत्वा पुत्रेण भणितं । यदि मम वधेन राजा शतायुर्भवति तर्हि तदा किमन्विष्यते ।

माता यदि विषं दद्यात्पित्रा विक्रीयते सुतः ।
राजा हरति सर्वस्वं शरणं कस्य जायते ॥

दुहित्रापि भणितं । अहमपि शिरो ददामि । चत्वारोऽपि पर्यालोच्य भट्टारिकाया भवनं गताः । तत्र राज्ञा प्रछन्नेन भणितं ।

सा हि संपद्यते बुद्धिः सा मतिः सा च भावना ।
सहायास्तादृशा एव यादृशी भवितव्यता ॥

वीरवरेण भट्टारिकायाः पुरतो गत्वा पूजां विधाय खड्गमाकृष्य भणितं । देवि भगवति मम पुत्रस्य वधेन राजा शता-

युर्भवतु। इत्युदीर्य शिरश्छित्त्वा पातितं भूमौ। भ्रातरं व्यापादितं दृष्ट्वा भगिन्या निजदेहं त्यक्तं। मात्रापि आत्मा व्यापादितः। वीरवरेण चिन्तितं। त्रयाणामपि मरणं संजातं। राजसेवां कृत्वा कस्य योग्यं सुवर्णसहस्रमेकं ग्रहीष्यामि। छुरिकामाकृष्य निजमस्तकं छित्त्वा भूतले पातितं। सर्वेषां क्षयं दृष्ट्वा राज्ञा चिन्तितं। ममार्थे ऽस्य कुटुम्बस्य क्षयः संजातः। तस्माद्राज्येन किं प्रयोजनं। छुरिकामाकृष्य यावन्निजशिरश्छेदं करोति तावद्देव्या भणितं। पुत्र तुष्टाहं तव साहसेन। इदानीं वरं ब्रूहि। राज्ञोक्तं। देवि भगवति यदि तुष्टासि तदैते चत्वारो ऽक्षतशरीरा एव तादृशा भवन्तु। देव्या भणितं। एवं भवतु। पातालादमृतमानीय चत्वारो ऽपि जीवापिताः। राजापि प्रसन्नः सन्स्वगृहं जगाम। ते ऽपि वीरवरादयः स्वकीयं मन्दिरं गताः। ततः प्रभातसमये राजा सभायामुपविष्टवान्। पुनरपि वीरवरः संयातः। राज्ञा वीरवरः पृष्टः। भो वीरवर रात्रौ स्त्री रोदनं किमर्थं चकार। वीरवरेणोक्तं।

क्षमी दाता गुणग्राही स्वामी पुण्येन लभ्यते।
नृपरक्षः शुचिर्दक्षः स्वामिन्भृत्यो ऽपि दुर्लभः ॥

ततो राज्ञापि वीरवरस्यार्धराज्यं दत्तं। उक्तं च।

सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति साधवः।
सकृत्कन्याः प्रदीयन्ते त्रीण्येतानि सकृत्सकृत् ॥

एतत्कथानकं कथयित्वा वेतालेनोक्तं। राजन्कथय। एतेषां

मध्ये कः सत्वाधिकः। राज्ञा विक्रमसेनेनोक्तं। राजा सत्वाधिकः। वेतालेनोक्तं। केन कारणेन। राज्ञोक्तं। स्वाम्यर्थे भृत्याः प्राणान्परित्यजन्ति। न तु भृत्यार्थे स्वामी। येन राज्यं तृणवत्कृत्वात्मानं हन्तुमारब्धमतः कारणाद्राजा सत्वाधिकः। एवं श्रुत्वा गतो वेतालः। गत्वा च पुनरपि शिंशिपावृक्षशाखायामवलम्बितः॥

इति चतुर्थं कथानकं समाप्तं ॥ ४ ॥

---

पुनस्तेन राज्ञा शिंशिपावृक्षान्मृतकमानीय स्कन्धे धृत्वा यावन्मार्गे प्रचलितं तावद्वेतालेनोक्तं। भो देव श्रूयतां। तावत्कथानकं कथयामि॥

अस्त्युज्जयिनी नाम पुरी। तत्र राजा महाबलो नाम। तस्य संधिविग्रहविशेषज्ञो हरिदासो नाम प्रधानमन्त्री। तस्य दुहिता महादेवी नाम। सा चातीव रूपवती वरयोग्या वर्तते। पिता वरचिन्तापन्नो बभूव। तयोक्तं। तात यस्य सम्यग्गुणो भवति तस्याहं दातव्या। तस्मिन्प्रस्तावे राज्ञा दक्षिणाधिपतिपार्श्वे पिता प्रहितः। तत्र गत्वा दक्षिणाधिपतिना सह दर्शनं संजातं। राज्ञोक्तं। भो हरिदास पठ किंचित्कलिकालस्वरूपं। हरिदासेनोक्तं। देव

कालः संप्रति वर्तते कलियुगे सत्या नरा दुर्लभा
देशाश्च प्रलयं गताः करभरैर्लोभं गताः पार्थिवाः।

नानाचौरगणा मुषन्ति पृथिवीं मार्गे जनः क्षीयते
पुत्रस्यापि न विश्वसन्ति पितरः कष्टं युगं वर्तते ॥
अनृतवक्तृता क्रोधश्चित्ते सतामवमानिता
मतिरविनये धर्मे शाठ्यं गुरुष्वपि वञ्चनं ।
ललितमधुरा वाक्प्रत्यक्षे परोक्षविभीषणा
कलियुग अहो राजन्नेताः स्फुरन्ति विभूतयः ॥
धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं च दूरे गतं
पृथ्वी मन्दफला नृपाश्च कुटिला लौल्ये स्थिता ब्राह्मणाः ।
लोकाः स्त्रीषु रताः स्त्रियोऽतिचपलाः शास्त्रागमे विक्लवाः
साधुः सीदति दुर्जनः प्रभवति प्रायः प्रविष्टः कलिः ॥

तत्रापि हरिदासोऽपि ब्राह्मणेनैकेनागत्य प्रार्थितः । निजदुहिता मम दीयतां। हरिदासेनोक्तं। यस्य सम्यग्गुणा भवन्ति तस्याहं दास्यामि। ब्राह्मणेनोक्तं। तर्हि दर्शयामि। इति तेन हस्ताद्घटितो रथो दर्शितः। एष रथश्चिन्तित आकाशे याति। हरिदासेनोक्तं। प्रभाते रथमादाय मम समीप आगन्तव्यं। ततः प्रभाते रथं गृहीत्वा समायातः। द्वावपि रथारूढावुज्जयिन्यां समायातौ। तत्रापि ज्येष्ठभ्राता ब्राह्मणेनैकेनागत्य प्रार्थितः । निजभगिनी मम दीयतां। भ्रात्रा भणितं। यस्य सम्यग्गुणो भवति तस्याहं दास्यामि। तेनोक्तं। अहं ज्ञानशास्त्रं जानामि। भ्रात्रोक्तं। तर्हि दत्ता मया। केनापि ब्राह्मणेनागत्य माता प्रार्थिता। निजदुहिता मम दीयतां। मात्रोक्तं। यस्य सम्यग्गुणो भवति

तस्याहं दास्यामि। तेनोक्तं। अहं धनुर्विद्यां जानामि शब्दवेधी। मात्रोक्तं। तर्हि दत्ता मया। एवं त्रयो वरा दुहितृदानं श्रुत्वा विवादं गताः। एका कन्या त्रयो वराः। विवादं कुर्वन्ति। किमिदं भविष्यति॥

रात्रौ सा कन्यातीव रूपिणी केनापि राक्षसेन विन्ध्याद्रौ नीता। यतः।

अतिरूपहृता सीता अतिगर्वेण रावणः।
अतिदाने बलिर्बद्ध अति सर्वत्र वर्जयेत्॥

प्रभाते त्रयो वराः समायाताः। तेषां मध्ये ज्ञानी पृष्टः। भो ज्ञानिन्साधु विद्यते। तेन कठिनीमादाय गणितमुक्तं च। सा विन्ध्ये वर्तते राक्षसेन नीता। द्वितीयेन शब्दवेधिनोक्तं। राक्षसं व्यापाद्याहमानयिष्यामि। तृतीयेनोक्तं। मदीये रथ आरुह्य गच्छ। स रथमारुह्य गतः। तत्र गत्वा राक्षसं व्यापाद्य रथ आरोप्यानीता सा कन्या। तस्या अर्थे त्रयो वराः परस्परं विवादं कुर्वन्ति। पित्रा चिन्तितं। सर्वे कृतोपकाराः कस्मै दीयते कस्मै न दीयते॥

एतत्कथानकं कथयित्वा वेतालेनोक्तं। राजन्कथय। एतेषां मध्ये कस्य भार्या भवति। विक्रमसेनेनोक्तं। ज्ञानिभार्या भवति। वेतालेनोक्तं। सर्वे समानगुणाः कथं तस्य भार्या भवति। राज्ञा विक्रमसेनेनोक्तं।

उद्यमः साहसं धैर्य बलं बुद्धिः पराक्रमः।
षडेते यस्य तिष्ठन्ति तस्माद्देवो ऽपि शङ्कितः॥

एवं श्रुत्वा गतो वेतालः। गत्वा च पुनरपि शिंशिपावृक्षशाखायामवलम्बितः॥

इति पञ्चमं कथानकं समाप्तं॥५॥

---

## अथ शुकसप्ततिनाम्नः कथासंग्रहस्यामुखं॥

प्रणम्य शारदां देवीं दिव्यविज्ञानशालिनीं।
कुर्वे भवविनोदार्थमुद्धारं कीरसप्ततेः॥

अस्ति चन्द्रकुलं नाम नगरं। तत्र विक्रमसेनो नाम राजा। तत्रैव च हरिदत्तो नाम श्रेष्ठी। तस्य भार्या हरिदत्ता। तयोः सुतो मदननामा। तस्य यौवने सोमदत्तश्रेष्ठिसुता प्रभावती नाम पत्न्यासीत्। स च मदनो ऽतीव विषयासक्तमनाः। ततस्तत्प्रतिबोधाय श्रेष्ठिमित्त्रत्रिविक्रमब्राह्मणेनानीतौ गन्धर्वपुत्रौ मलजातिजीवौ शुकशारिकौ पञ्जरस्थौ कृतौ॥

शुकशारिकोत्पत्तिरेवं॥

अस्त्यत्र मलयो नाम शिखरी चन्दनाश्रयः।
तन्निकुञ्जे दिवो भ्रष्टः शुको ऽस्ति गुणसागरः॥
शारिका च तथा भ्रष्टा हिमवच्छिखराश्रिता।
प्रवीणा पूर्वशास्त्रेण वाग्विनोदपरायणा॥

एतयोः शापं चेत्थं त्रिविक्रमो ब्राह्मण उवाच। पुराहं

खेचरो ऽभूवं मेरोरुपरि सिद्धाश्रमनिवासी। तत्र सिद्धाश्रमे कल्पद्रुमादि वनं। तत्र च मानसं सरः। तच्च देवगणैः सेवितं। इत्यादि। तत्र पुष्पापीडाख्यो गन्धर्वो रत्नुमाययौ। तद्भार्या शालिनी। ताभ्यां नाटककरणं। तत्र नाटके मूर्छनाः ११॥ स्वराः ७॥ तालाः ४९॥ रागाः ६॥ रागिण्यः ३०॥ भाषादिरूपगीतानि च १०८॥ आदिनृत्ते ऽहं समिदाहरणार्थं तत्रायातः। तत इन्द्रागमनं। तत्तथा दृष्ट्वा कोपार्दित इन्द्रस्तयोः स्वेच्छावृत्तिं न सहते। तौ शुकशारिकारूपौ भयेन नष्टाविन्द्रशापेन वियुक्तावेको मलये ऽपरा हिमवति। राजपुत्रस्योपकृतौ शापान्तो भविष्यतीति शापानुग्रहः। ममापि मद्गुरोः शापः। भो ब्राह्मण त्रिविक्रम राजपुत्रोपकृतौ शापान्तः॥ ततो ब्राह्मणेन त्रिविक्रमेण मन्त्रध्यानबलेन शारिकायुतशुकानयनं कृतं। तयोः पञ्जरे स्थितिः। मदनवासगृहे मोचनं॥

शुकेन विषयासक्तिनिरासाय मदनः प्रोक्तः। श्लाघ्यस्त्वं यदेवं सुखमनुभवसि। यतः।

फलं धर्मस्य विभवो विभवस्य फलं सुखं।
सुखमूलं तु तन्वंग्यो विना ताभिः कुतः सुखं॥

इत्यादि परं तव कामतत्त्वमेवास्ति न धर्मार्थौ। यतः।

कुलमार्गपरः श्रेष्ठः पित्रोः शुश्रूषकः शुचिः।
शास्त्रमार्गानुसारी च धर्मिष्ठो धर्ममाप्नुयात्॥
न्यायवादी स्थिरारम्भः क्षिप्रकारी महोद्यमः।

अदीनो ऽकोपनश्चैव नरः श्रीभाजनं भवेत् ॥

कामं च त्वं स्वयं वेत्सि। परं कामसेवनं त्वत्यासक्त्या न युक्तं। यतः पित्रोस्ते इत्यादिश्लोकबन्धनयालंकृतः सप्तति-संबन्धो ऽयमलेखि ॥

शुको मदनमुद्दिश्य जल्पति ॥

पित्रोस्ते दुःखिनोर्दुःखात्पतत्यश्रुचयो भुवि।
तेन पापेन ते वत्स पतनं देवशर्मवत् ॥

शृणु तावत्कथयामि। अस्ति पद्मपुरं नाम नगरं। तत्र सत्यधर्मा ब्राह्मणः। तस्य भार्या धर्मशीलाभिधा। सुतो देवशर्मा। स च प्राप्तविद्यो ऽपि मातृपितृतः प्रच्छन्नवृत्त्या विद्यार्थं सिद्धिस्थानं नाम देशान्तरं गतः। तीर्थं च तत्। कोपाद्व्याप्ततेजसा तत्र शिंशिपोपरि स्थितां वलाकां भस्मीकृत्य नारायणाद्विजगृहं भिक्षार्थं प्रविष्टः। स्वभर्तृशुश्रूषापरया तत्पत्न्या कोपाविष्टो निर्भर्त्सितः। सत्पक्षिदग्धाहं वलाकावत्कोपस्थानं। इति श्रुत्वा स प्रच्छन्नज्ञानाद्भीतो विस्मितश्च। प्रेषितश्च तया धर्मव्याधपार्श्वे वाराणसीं नगरीं ययौ। तत्र रक्तादनं यमप्रभं मांसविक्रयं विदधानं व्याधं दृष्ट्वादूरसामन्ते स्थितः। व्याधेन स्वागतप्रश्नादि विहितं। निजपितरौ सभक्तिकं भोजयित्वा तस्य परमान्नादि भोजनं दत्तं। तदनन्तरं तेन ब्राह्मणेन व्याधः स्पष्टं पृष्टः। कथं सती ज्ञानवती। कथं च त्वं ज्ञानवान्। तेन व्याधेनोक्तं।

निजान्वयप्रणीतं यो नित्यं धर्मं निषेवते।

उत्तमाधममध्येषु विचारेष्वपराङ्मुखः ॥
स गृही स मुनिः साधुः पितृशुश्रूषकश्च सः ।
तेनाहं परिशुश्रूषां यावज्जीवं त्यजामि नो ॥

अत एव मम ज्ञानमुत्पन्नमस्ति। त्वं च निजपितरौ परित्यज्य परिभ्रमन्मादृशां न संभाषणार्हः। परं त्वतिथित्वाज्जल्पितः। एवमुक्तः स ब्राह्मणो विनयपरं तं पप्रच्छ। तेनोक्तं।

न पूज्यान्पूजयन्ते ये न मान्यान्मानयन्ति च ।
जीवन्ति निन्द्यमानास्ते मृताः स्वर्गं न यान्ति च ॥

अतः। व्याधेन बोधितस्तेन ब्राह्मणः सत्क्रियो गृहे ।
अभवत्प्रीतिशोभाढ्यः परतः कीर्तिभाजनं ॥

तस्मात्स्वकुलोद्भवं धर्मं स्मर पित्रोश्च विनयपरो भव। पुत्रेण किं फलं यः पितृदुःखाय वर्तते। तस्माद्गन्तव्यं ते तात देशान्तरं। एवं शुकेन प्रतिबोधितः स मदनः पितरौ नमस्कृत्य तदनुज्ञातः। कान्ते कथय कथं भविष्यसि त्वं कथं त्वां विनाहं भविष्यामीति भार्यां चापृच्छ्य तुरंगमारूढवान्गतो देशान्तरं ॥

पश्चात्तत्पत्नी कतिचिद्दिनानि शोकयुक्ता सती स्वैरिणीभिः सखीभिः प्रतिबोधिता पुरुषान्तराभिलाषुकाभवत्। ततस्ताभिरेवमुक्तं।

तावत्पिता वरो बन्धुर्यावज्जीवति मानवः ।
मृतो मृत इति ज्ञात्वा क्षणात्स्नेहो निवर्तते ॥
दिनैः कतिपयैः संस्थं यौवनं सुनितम्बिनि ।

कामं कमलपत्राक्षि भुङ्क्ष्व भोगानहर्निशं ॥

स्वपतिमप्राप्यमाणा पुरुषान्तरं भजस्व । यतः । क्षणभङ्गि यौवनं । इत्यादि प्रतिबोध्य पुरुषान्तरं गुणचन्द्रसंज्ञं रमणाय शृङ्गारं विधाय यावच्चलति तावच्छारिकावदत् । मा गच्छेत्यादिवचनैर्निर्भर्त्सिता । ततस्तया सा गलमोटनपूर्वं विनाशिता । ततः क्षणं स्थित्वा स्वेष्टदेवतां हृदि स्मृत्वा ताम्बूलादि प्रगृह्य यावच्चलति तावच्छुकः प्राह । सिद्धिरस्तु शिवाः सन्तु तव पन्थानः । क्व गन्तव्यं इत्यादिवाक्यैः पृष्टा । सा च शुकवचनं शकुनमिव कृत्वा हृष्टा शुकं प्राह । हे शुकराज जनान्तरास्वादं विज्ञातुं चलितास्मि । शुक उवाच । युक्तमिदं कर्तव्यमेव । परं यद्दुष्करं पतति तन्निन्दितं कुलस्त्रीणां । विपरीते पाते सति बुद्धिरस्ति न वा । यदि नास्ति तदा पराभवपदं भविष्यसि ॥ यतः ।

कौतुकान्वेषिणो नित्यं दुर्जया व्यसनागमे ।
मासोपवासिनी यद्वद्वणिक्पुत्रकचग्रहे ॥

ससंभ्रमं जगादाथ किमिदं भाषितं शुक ।
पप्रच्छ सा तदा सार्द्धं पांशुलाभिः कृतादरा ॥

स उवाच ।

यदि ते कौतुकं सुभ्रु परार्थं गच्छ सुन्दरि ।
स्थिरीभूय त्वया पश्चाच्छ्राव्येयं महती कथा ॥

एवं शुकोक्तं श्रुत्वा कौतुकाकुलचेतसा यावत्सा निजगृह आसीनास्ति तावच्छुकः कथामाह ॥

चन्द्रावती पुरी। तत्र भीमो नाम महाराजः। तत्र च मोहनश्रेष्ठिसुतः सुधनो नाम। स तन्नगरवासिनो हरिदत्तस्य कलत्रं लक्ष्मीनाम्नीं रन्तुं समीहते। ततो मासोपवासिनीं पूर्णानाम्नीं प्रचुरैर्धनमानदानैरावर्ज्य हरिदत्ते नगराद्बहिर्गते सति दूतित्वेन स प्रेषयामास हरिदत्तस्य गृहे। सापि चाटूक्तिभिर्लक्ष्मीं प्रसन्नां चक्रे। प्रसन्नया तया चेत्युक्तं। यत्त्वं याचसे तत्करोमि। पूर्णयोक्तं। तर्हि ममाभिमतं नरं भज। तयोक्तं। कुलवधूनां नैतद्युज्यते। परं तु तवाग्रे प्रतिपन्नत्वात्करोमि। उक्तं च।

अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु चात्मपृष्ठे।
अम्भोनिधिर्वहति दुःसहवाडवाग्नि-
मङ्गीकृतं सुकृतिनः परिपालयन्ति॥

तच्छ्रुत्वा हृष्टा पूर्णा। एवमेवैतत्। ततस्तां लक्ष्मीं प्रविधाय प्रदोषे स्वगृहं निनाय। ततो मोहनश्रेष्ठिसुतः कथितवेलोपरि नागतः किंचित्कार्यवैयग्र्येण। ततो लक्ष्म्या सकामयोक्तं। अन्यं नरं शीघ्रं समानय। ततः पूर्णयात्याकुलितमूढया तत्पतिरेव समानीतः। स्वभर्तरि समानीते सा किं करोतु। किं गृहं यातु किं वान्यत्किंचित्करोतु। इति विचारयतु भवती सपरिवारा। तयोक्तं। न जानीमः। त्वमेव कथय। शुक उवाच। यदि न जानासि ततो विपरीते पतिते कथं निर्वहसीति। तर्हि श्रूयतां। स आग-

ह्नेव स्वपतिरित्यभिज्ञातः। ततः कचग्रहं प्रगृह्य प्रोक्तः। हे शठ त्वं ममाग्र इति जल्पसि यत्त्वां विना ममान्या वल्लभा नास्ति। अधुना तु मया परीक्षितोऽसि मया ज्ञातश्चेति कोपं चक्रे। स च तां सुकोमलवचनैरनुनीय कष्टेन स्वगृहं निन्य इति

कथां श्रुत्वा शुकेनोक्तां भयविस्मयकारिणीं।
पुंश्चलीवृन्दसंयुक्ता प्रसुप्ता सा प्रभावती॥

इति शुकसप्ततिग्रन्थे शुकेन्द्रप्रोक्तं प्रथमं कथानकं॥

---

## अथ श्रीमहाभारते विडालस्य धर्मध्वजत्वं॥

मार्जारः किल दुष्टात्मा निश्चेष्टः सर्वकर्मसु।
ऊर्द्ध्वबाहुः स्थितो राजन्गङ्गातीरे कदाचन॥१॥
स वै कृत्वा मनःशुद्धिं प्रत्ययार्थं शरीरिणां।
करोमि धर्ममित्याह सर्वानेव शरीरिणः॥२॥
तस्य कालेन महता विश्रम्भं जग्मुरण्डजाः।
समेत्य च प्रशंसन्ति मार्जारं तं विशाम्पते॥३॥
पूज्यमानस्तु तैः सर्वैः पक्षिभिः पक्षिभोजनः।
आत्मकार्यं कृतं मेने चर्यायाश्च कृतं फलं॥४॥
अथ दीर्घस्य कालस्य तं देशं मूषिका ययुः।
ददृशुस्तं च ते तत्र धार्मिकं व्रतचारिणं॥५॥

कार्येण महता युक्तं दम्भयुक्तेन भारत ।
तेषां मतिरियं राजन्नासीत्तत्र विनिश्चये ॥ ६ ॥
बहुमित्रा वयं सर्वे तेषां नो मातुलो ह्ययं ।
रक्षां करोतु सततं वृद्धबालस्य सर्वशः ॥ ७ ॥
उपगम्य तु ते सर्वे बिडालमिदमब्रुवन् ।
भवत्प्रसादादिच्छामश्चर्तुं चैव यथासुखं ॥ ८ ॥
भवान्नो गतिरव्यग्रा भवान्नः परमः सुहृत् ।
ते वयं सहिता सर्वे भवन्तं शरणं गताः ॥ ९ ॥
भवान्धर्मपरो नित्यं भवान्धर्मे व्यवस्थितः ।
स नो रक्ष महाप्राज्ञ त्रिदशानिव वज्रभृत् ॥ १० ॥
एवमुक्तस्तु तैः सर्वैर्मूषिकैः स विशाम्पते ।
प्रत्युवाच तथा सर्वान्मूषिकान्मूषिकान्तकृत् ॥ ११ ॥
द्वयोर्योगं न पश्यामि तपसो रक्षणस्य च ।
अवश्यं तु मया कार्यं वचनं भवतां हितं ॥ १२ ॥
युष्माभिरपि कर्तव्यं वचनं मम नित्यशः ।
तपसास्मि परिश्रान्तो दृढं नियममास्थितः ॥ १३ ॥
न चापि गमने शक्तिं कांचित्पश्यामि चिन्तयन् ।
सो ऽस्मि नेयः सदा तात नदीकूलमितःपरं ॥ १४ ॥
तथेति ते परिज्ञाय मूषिका भरतर्षभ ।
वृद्धबालमथो सर्वं मार्जाराय न्यवेदयन् ॥ १५ ॥
ततः स पापो दुष्टात्मा मूषिकानथ भक्षयन् ।
पीवरश्च सुवर्णश्च दृढबन्धश्च जायते ॥ १६ ॥

मूषिकाणां गणश्चात्र भृशं संक्षीयते ऽथ सः ।
मार्जारो वर्धते चापि तेजोबलसमन्वितः ॥ १७ ॥
ततस्ते मूषिकाः सर्वे समेत्यान्योन्यमब्रुवन् ।
मातुलो वर्धते नित्यं वयं क्षीयामहे भृशं ॥ १८ ॥
ततः प्राज्ञतमः कश्चिड्डिण्डिको नाम मूषिकः ।
अब्रवीद्वचनं राजन्मूषिकाणां महागणं ॥ १९ ॥
गच्छतां वो नदीतीरं सहितानां विशेषतः ।
पृष्ठतो ऽहं गमिष्यामि सहैव मातुलेन तु ॥ २० ॥
साधु साध्विति ते सर्वे पूजयांचक्रिरे तदा ।
चक्रुश्चैव यथान्यायं डिण्डिकस्य वचो ऽर्थवत् ॥ २१ ॥
अविज्ञानात्ततः सो ऽथ डिण्डिकं ह्युपभुक्तवान् ।
ततस्ते सहिताः सर्वे मन्त्रयामासुरञ्जसा ॥ २२ ॥
तत्र वृद्धतमः कश्चित्कोकिलो नाम मूषिकः ।
अब्रवीद्वचनं राजञ्ज्ञातिमध्ये यथातथं ॥ २३ ॥
न मातुलो धर्मकामश्छद्ममात्रं कृता शिखा ।
न मूलफलभक्षस्य विष्ठा भवति लोमशा ॥ २४ ॥
अस्य गात्राणि वर्धन्ते गणश्च परिहीयते ।
अद्य सप्ताष्टदिवसाड्डिण्डिको ऽपि न दृश्यते ॥ २५ ॥
एतच्छ्रुत्वा वचः सर्वे मूषिका विप्रदुद्रुवुः ।
बिडालो ऽपि सुदुष्टात्मा जगामैव यथागतं ॥ २६ ॥

इति श्रीमहाभारत उद्योगपर्वणि बिडालस्य धर्मध्वजत्वं ॥

## अथ श्रीमहाभारते जम्बुकनीतिः ॥

धृतराष्ट्र उवाच ॥

कथं सान्त्वेन दानेन भेदैर्दण्डेन वा पुनः ।
अमित्रः शक्यते हन्तुं तन्मे ब्रूहि यथातथं ॥ १ ॥

कणिक उवाच ॥

शृणु राजन्यथा वृत्तं वने निवसतः पुरा ।
जम्बुकस्य महाराज नीतिशास्त्रार्थदर्शिनः ॥ २ ॥
अथ कश्चित्कृतप्रज्ञः शृगालः स्वार्थपण्डितः ।
सखिभिर्न्यवसत्सार्द्धं व्याघ्राखुवृकबभ्रुभिः ॥ ३ ॥
ते ऽपश्यन्विपिने तस्मिन्बलिनं मृगयूथपं ।
अशक्ता ग्रहणे तस्य ततो मन्त्रममन्त्रयन् ॥ ४ ॥

जम्बुक उवाच ॥

असकृद्यतितो ह्येष हन्तुं व्याघ्र वने त्वया ।
युवा वै जवसंपन्नो बुद्धिशाली न शक्यते ॥ ५ ॥
मूषिको ऽस्य शयानस्य चरणौ भक्षयत्वयं ।
अथैनं भक्षितैः पादैर्व्याघ्रो गृह्णातु वै ततः ॥ ६ ॥
[ततो वै भक्षयिष्यामः सर्वे मुदितमानसाः]
जम्बुकस्य तु तद्वाक्यं तथा चक्रुः समाहिताः ।
मूषिकभक्षितैः पादैर्मृगं व्याघ्रो ऽवधीत्तदा ॥ ७ ॥
दृष्ट्वैवाचेष्टमानं तु भूमौ मृगकलेवरं ।
स्नात्वागच्छत भद्रं वो रक्षामीत्याह जम्बुकः ॥ ८ ॥

शृगालवचनात्ते ऽपि गताः सर्वे नदीं ततः ।
स चिन्तापरमो भूत्वा तस्थौ तत्रैव जम्बुकः ॥ ९ ॥
अथाजगाम पूर्वं तु स्नात्वा व्याघ्रो महाबलः ।
ददर्श जम्बुकं चैव चिन्ताकुलितमानसं ॥ १० ॥

व्याघ्र उवाच ॥

किं शोचसि महाप्राज्ञ त्वं नो बुद्धिमतां वरः ।
अशित्वा पिशितान्यद्य विहरिष्यामहे वयं ॥ ११ ॥

जम्बुक उवाच ॥

शृणु मे त्वं महाबाहो यद्वाक्यं मूषिको ऽब्रवीत् ।
धिग्बलं मृगराजस्य मयाद्यायं मृगो हतः ॥ १२ ॥
मद्बाहुबलमाश्रित्य तृप्तिमद्य गमिष्यति ।
गर्जमानस्य तस्यैवमतो भक्ष्यं न रोचये ॥ १३ ॥

व्याघ्र उवाच ॥

ब्रवीति यदि स ह्येवं काले ह्यस्मिन्प्रबोधितः ।
स्वबाहुबलमाश्रित्य हनिष्ये ऽहं वनेचरान् ॥ १४ ॥
खादिष्ये तत्र मांसानि इत्युक्त्वा प्रस्थितो वनं ॥ १५ ॥
एतस्मिन्नेव काले तु मूषिको ऽप्याजगाम ह ।
तमागतमभिप्रेत्य शृगालो ऽप्यब्रवीद्वचः ॥ १६ ॥

जम्बुक उवाच ॥

शृणु मूषिक भद्रं ते नकुलो यदिहाब्रवीत् ।
मृगमांसं न खादेयं गरमेतन्न रोचते ॥ १७ ॥
मूषिकं भक्षयिष्यामि तद्भवाननुमन्यतां ।

तच्छ्रुत्वा मूषिको वाक्यं संत्रस्तः प्रगतो बिलं ॥ १८ ॥
ततः स्नात्वा स वै तत्र आजगाम वृको नृप ।
तमागतमिदं वाक्यमब्रवीज्जम्बुकस्तदा ॥ १९ ॥
मृगराजो हि संक्रुद्धो न ते साधु भविष्यति ।
सकलत्रस्त्विहायाति कुरुष्व यदनन्तरं ॥ २० ॥
एवं संचोदितस्तेन जम्बुकेन तदा वृकः ।
ततो ऽवलुम्पनं कृत्वा प्रयातः पिशिताशनः ॥ २१ ॥
एतस्मिन्नेव काले तु नकुलो ऽप्याजगाम ह ।
तमुवाच महाराज नकुलं जम्बुको वने ॥ २२ ॥
स्वबाहुबलमाश्रित्य निर्जितास्ते ऽन्यतो गताः ।
मम दत्त्वा नियुद्धं त्वं भुङ्क्ष्व मांसं यथेप्सितं ॥ २३ ॥

नकुल उवाच ॥

मृगराजो वृकश्चैव बुद्धिमानपि मूषिकः ।
निर्जिता यत्त्वया वीरास्तस्माद्वीरतरो भवान् ॥ २४ ॥
न त्वयाप्युत्सहे योद्धुमित्युक्त्वा सो ऽप्यपागमत् ॥ २५ ॥

कणिक उवाच ॥

एवं तेषु प्रयातेषु जम्बुको हृष्टमानसः ।
खादति स्म तदा मांसमेकः सन्मन्त्रनिश्चयात् ॥ २६ ॥
एवं समाचरन्नित्यं सुखमेधेत भूपतिः ॥ २७ ॥
भयेन भेदयेद्भीरुं शूरमञ्जलिकर्मणा ।
लुब्धमर्थप्रदानेन समं न्यूनं तथौजसा ॥ २८ ॥

इति श्रीमहाभारत आदिपर्वणि जम्बुकनीतिः ॥

## अथ श्रीमहाभारते ऽसज्जननिदर्शनं ॥

वने महति कस्मिंश्चिदमनुष्यनिषेविते ।
ऋषिर्मूलफलाहारो नियतो नियतेन्द्रियः ॥ १ ॥
दीक्षादमपरः शान्तः स्वाध्यायपरमः शुचिः ।
उपवासविशुद्धात्मा सततं सत्त्वमास्थितः ॥ २ ॥
तस्य संदृश्य सद्भावमुपविष्टस्य धीमतः ।
सर्वे सत्त्वाः समीपस्था भवन्ति वनचारिणः ॥ ३ ॥
सह व्याघ्रगणाः क्रूरा मत्ताश्चैव महागजाः ।
द्वीपिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः ॥ ४ ॥
ते सुखप्रश्नदाः सर्वे भवन्ति क्षतजाशनाः ।
[तस्यर्षेः शिष्यवच्चैव न्यग्भूताः प्रियकारिणः]
दत्त्वा च ते सुखप्रश्नं सर्वे यान्ति यथागतं ॥ ५ ॥
ग्राम्यस्त्वेकः पशुस्तत्र नाजहात्स महामुनिं ।
भक्तो ऽनुरक्तः सततमुपवासकृशो ऽबलः ॥ ६ ॥
फलमूलोदकाहारः शान्तः शिष्याकृतिर्यथा ॥ ७ ॥
तस्यर्षेरुपविष्टस्य पादमूले महामते ।
मनुष्यवद्गतो भावं स्नेहबद्धो ऽभवद्भृशं ॥ ८ ॥
ततो ऽभ्ययान्महावीर्यो द्वीपी क्षतजभोजनः ।
श्वार्थमत्यन्तसंतुष्टः क्रूरः काल इवान्तकः ॥ ९ ॥
लेलिह्यमानस्तृषितः पुच्छास्फोटनतत्परः ।
व्यादितास्यः क्षुधाभुग्नः प्रार्थयानस्तदामिषं ॥ १० ॥

दृष्ट्वा तं क्रूरमायान्तं जीवितार्थी नराधिप ।
प्रोवाच श्वा मुनिं तत्र तच्छृणुष्व विशांपते ॥ ११ ॥
श्वशत्रुर्भगवन्नेष द्वीपी मां हन्तुमिच्छति ।
त्वत्प्रसादाद्भयं न स्यादस्मान्मम महामुने ॥ १२ ॥
[तथा कुरु महाबाहो सर्वज्ञस्त्वं न संशयः]
स मुनिस्तस्य विज्ञाय भावज्ञो भयकारणं ।
रुतज्ञः सर्वसत्त्वानां तमैश्वर्यसमन्वितः ॥ १३ ॥

मुनिरुवाच ॥

न भयं द्वीपिनः कार्यं मृत्युतस्ते कथंचन ।
एष स्वरूपरहितो द्वीपी भवसि पुत्रक ॥ १४ ॥
ततः श्वा द्वीपितां नीतो जाम्बूनदनिभाकृतिः ।
चित्राङ्गो विस्फुरद्दंष्ट्रो वने वसति निर्भयः ॥ १५ ॥
तं दृष्ट्वा संमुखे द्वीपी आत्मनः सदृशं पशुं ।
अविरुद्धस्ततस्तस्य क्षणेन समपद्यत ॥ १६ ॥
ततो ऽभ्ययान्महारौद्रो व्यादितास्यः क्षुधान्वितः ।
द्वीपिनं लेलिहद्वक्त्रो व्याघ्रो रुधिरलालसः ॥ १७ ॥
व्याघ्रं दृष्ट्वा क्षुधाविष्टं दंष्ट्रिणं वनगोचरं ।
द्वीपी जीवितरक्षार्थमृषिं शरणमीयिवान् ॥ १८ ॥
संवासजं परं स्नेहमृषिणा कुर्वता तदा ।
स द्वीपी व्याघ्रतां नीतो रिपूणां बलवत्तरः ॥ १९ ॥
ततो दृष्ट्वा स शार्दूलो नाहनत्तं विशांपते ॥ २० ॥
स तु श्वा व्याघ्रतां प्राप्य बलवान्पिशिताशनः ।

न मूलफलभोगेषु स्पृहामप्यकरोत्तदा ॥ २१ ॥
यथा मृगपतिर्नित्यं प्रकाङ्क्षति वनौकसः ।
तथैव स महाराज व्याघ्रः समभवत्तदा ॥ २२ ॥
व्याघ्रश्चोटजमूलस्थस्तृप्तः सुप्तो हतैर्मृगैः ।
गजश्चागात्तमुद्देशं मत्तो मेघ इवोत्थितः ॥ २३ ॥
प्रभिन्नकरटः प्रांशुः पद्मी विततकुम्भकः ।
सुविषाणो महाकायो मेघगम्भीरनिस्वनः ॥ २४ ॥
तं दृष्ट्वा कुञ्जरं मत्तमायान्तं बलगर्वितं ।
व्याघ्रो हस्तिभयात्त्रस्तस्तमृषिं शरणं ययौ ॥ २५ ॥
ततोऽनयत्कुञ्जरत्वं व्याघ्रं तमृषिसत्तमः ।
महामेघनिभं दृष्ट्वा स भीतो ह्यभवद्गजः ॥ २६ ॥
ततः कलमषण्डानि शल्लकीगहनानि च ।
व्यचरत्स मुदा युक्तः पद्मरेणुविभूषितः ॥ २७ ॥
कदाचिद्रममाणस्य हस्तिनः संमुखं तदा ।
ऋषेरस्योटजस्थस्य कालोऽगच्छन्निशानिशं ॥ २८ ॥
अथाजगाम तं देशं केशरी केशरारुणः ।
गिरिकन्दरजो भीमः सिंहो नागकुलान्तकः ॥ २९ ॥
तं दृष्ट्वा सिंहमायान्तं नागः सिंहभयार्दितः ।
ऋषिं शरणमापेदे वेपमानो भयातुरः ॥ ३० ॥
स ततः सिंहतां नीतो नागेन्द्रो मुनिना तदा ।
वन्यं नागणयत्सिंहं तुल्यजातिसमन्वयात ॥ ३१ ॥
दृष्ट्वा च सोऽभवत्सिंहो वन्यो भयसमन्वितः ।

स चाश्रमे ऽवसत्सिंहस्तस्मिन्नेव महावने ॥ ३२ ॥
तद्भयात्पशवो नान्ये तपोवनसमीपतः ।
व्यदृश्यन्त तदा त्रस्ता जीविताकाङ्क्षिणस्तदा ॥ ३३ ॥
कदाचित्कालयोगेन सर्वप्राणिविहिंसकः ।
बलवान्क्षतजाहारो नानासत्त्वभयंकरः ॥ ३४ ॥
अष्टपादूर्ध्वनयनः शरभो वनगोचरः ।
तं सिंहं हन्तुमागच्छन्मुनेस्तस्य निवेशनं ॥ ३५ ॥
तं मुनिः शरभं चक्रे बलोत्कटमरिंदमं ॥ ३६ ॥
ततः स शरभो वन्यो मुनेः शरभमग्रतः ।
दृष्ट्वा बलिनमत्युग्रं द्रुतं संप्राद्रवद्वनात् ॥ ३७ ॥
स एवं शरभस्थाने संन्यस्तो मुनिना तदा ।
मुनेः पार्श्वगतो नित्यं शरभः सुखमाप्तवान् ॥ ३८ ॥
ततः शरभसंत्रस्ताः सर्वे मृगगणास्तदा ।
दिशः संप्राद्रवन्राजन्भयाज्जीवितकाङ्क्षिणः ॥ ३९ ॥
शरभो ऽप्यतिसंहृष्टो नित्यं प्राणिवधे रतः ।
फलमूलाशनं कर्तुं नैच्छत्स पिशिताशनः ॥ ४० ॥
ततो रुधिरतर्षेण बलिना शरभो ऽन्वितः ।
इयेष तं मुनिं हन्तुमकृतज्ञः श्वयोनिजः ॥ ४१ ॥
ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा ।
विज्ञाय स महाप्राज्ञो मुनिः श्वानं तमुक्तवान् ॥ ४२ ॥
श्वा त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः ।
व्याघ्रान्नागो मदपटुर्नागः सिंहत्वमागतः ॥ ४३ ॥

सिंहस्त्वं बलमापन्नो भूयः शरभतां गतः ।
महास्नेहपरीतेन विसृष्टो नकुलान्वयः ॥ ४४ ॥
यस्मादेवमपापं मां पाप हिंसितुमिच्छसि ।
तस्मात्स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि ॥ ४५ ॥
ततो मुनिजनद्वेष्टा दुष्टात्मा प्राकृतोऽबुधः ।
ऋषिणा शरभः शप्तस्तद्रूपं पुनराप्तवान् ॥ ४६ ॥
स श्वा प्रकृतिमापन्नः परं दैन्यमुपागतः ।
ऋषिणा हुंकृतः पापस्तपोवनबहिष्कृतः ॥ ४७ ॥

इति श्रीमहाभारते शान्तिपर्वण्यसज्जननिदर्शनं ॥

## अथ ब्रह्मपुराणे कण्डूपाख्यानं ॥

व्यास उवाच ॥

तस्मिन्क्षेत्रे मुनिश्रेष्ठाः सर्वसत्त्वसुखावहे ।
धर्मार्थकाममोक्षाणां फलदे पुरुषोत्तमे ॥ १ ॥
कण्डुर्नाम महातेजा ऋषिः परमधार्मिकः ।
सत्यवादी शुचिर्दान्तः सर्वभूतहिते रतः ॥ २ ॥
जितेन्द्रियो जितक्रोधो वेदवेदाङ्गपारगः ।
अवाप परमां सिद्धिमाराध्य पुरुषोत्तमं ॥ ३ ॥
अन्येऽपि तत्र संसिद्धा मुनयः संयतेन्द्रिया ।
सर्वभूतहिता दान्ता जितक्रोधा विमत्सराः ॥ ४ ॥

मुनय ऊचुः ॥

कः स कण्डुः कथं नाम जगाम परमां गतिं ।
श्रोतुमिच्छामहे तस्य चरितं ब्रूहि सत्तम ॥ ५ ॥

व्यास उवाच ॥

शृणुध्वं मुनिशार्दूलाः कथां तस्य मनोहरां ।
प्रवक्ष्यामि समासेन मुनेस्तस्य विचेष्टितं ॥ ६ ॥
पवित्रे गौतमीतीरे विजने सुमनोहरे ।
कन्दमूलफलैर्मेध्यैः समित्पुष्पकुशान्विते ॥ ७ ॥
कारण्डववकैर्हंसैः कूर्मैर्मद्गुभिरेव च ।
एतैश्चान्यैस्तथाकीर्णे समन्ताज्जलचारिभिः ॥ ८ ॥
तत्राश्रमपदं कण्डोर्बभूव मुनिसत्तमाः ।
नानाद्रुमलताकीर्णं नानामृगगणान्वितं ॥ ९ ॥
तपस्तेपे मुनिस्तत्र सुमहत्परमाद्भुतं ।
व्रतोपवासैर्नियमैः स्नानमौनसुसंयुतैः ॥ १० ॥
ग्रीष्मे पञ्चतपा भूत्वा वर्षासु स्थण्डिलेशयः ।
आर्द्रवासास्तु हेमन्ते स तेपे सुमहत्तपः ॥ ११ ॥
दृष्ट्वा तु तपसो वीर्यं मुनेस्तस्य सुविस्मिताः ।
बभूवुर्देवगन्धर्वाः सिद्धविद्याधरास्तथा ॥ १२ ॥
भूमिं तथान्तरीक्षं च दिवं च मुनिसत्तमाः ।
कण्डुः स तापयामास त्रैलोक्यं तपसो वशात् ॥ १३ ॥
अहो तस्य परं धैर्यमहो तस्य परं तपः ।
इत्यब्रुवंस्तदा देवा दृष्ट्वा तं तपसि स्थितं ॥ १४ ॥

मन्त्रयामासिरे व्यग्राः शक्रेण सहितास्तदा ।
भयात्तस्य समुद्विग्नास्तपोविघ्नमभीप्सवः ॥ १५ ॥
ज्ञात्वा तेषामभिप्रायं शक्रस्त्रिभुवनेश्वरः ।
प्रम्लोचाख्यां वरारोहां रूपयौवनगर्विताम् ॥ १६ ॥
सुमध्यां चारुदशनां पीनश्रोणिपयोधरां ।
सर्वलक्षणसंपन्नां प्रोवाच बलसूदनः ॥ १७ ॥
शक्र उवाच ॥
प्रम्लोचे गच्छ शीघ्रं त्वं यत्रासौ तपते मुनिः ।
विघ्नार्थं तस्य तपसः क्षोभयस्व च तं शुभे ॥ १८ ॥
प्रम्लोचोवाच ॥
तव वाक्यं सुरश्रेष्ठ करोमि सततं प्रभो ।
किंतु शङ्का ममैवात्र जीवितस्य च संशयः ॥ १९ ॥
बिभेमि तं मुनिश्रेष्ठं ब्रह्मचर्यव्रते स्थितं ।
दीप्ततेजसमत्युग्रं ज्वलनार्कसमप्रभं ॥ २० ॥
ज्ञात्वा मां च मुनिः क्रोधाद्विघ्नार्थं समुपागतां ।
कण्डुः परमतेजस्वी शापं दास्यति दुःसहं ॥ २१ ॥
उर्वशी मेनका रम्भा घृताची पुञ्जिकस्थला ।
विश्वाची सहजन्या च पूर्वचित्तिस्तिलोत्तमा ॥ २२ ॥
अलम्बुषा मिश्रकेशी शशिलेखा च वामना ।
अन्याश्चाप्सरसः सन्ति रूपयौवनगर्विताः ॥ २३ ॥
सुमध्याश्चारुदशनाः पीनोन्नतपयोधराः ।
कामप्रचारकुशलास्तत्र ताः संनियोजय ॥ २४ ॥

व्यास उवाच ॥

तस्यास्तद्वचनं श्रुत्वा पुनराह शचीपतिः ।

शक्र उवाच ॥

तिष्ठन्तु नाम चान्यास्तास्त्वं चात्र कुशला शुभे ॥ २५ ॥
कामं वसन्तं वायुं च सहायार्थं ददामि ते ।
तैः सार्द्धं गच्छ सुश्रोणि यत्रास्ते स महामुनिः ॥ २६ ॥

व्यास उवाच ॥

शक्रस्य वचनं श्रुत्वा तदा सा चारुलोचना ।
जगामाकाशमार्गेण तैः सार्द्धमुटजं मुनेः ॥ २७ ॥
सा गत्वा तत्र रुचिरं ददर्श मुनिसत्तमं ।
मुनिं च दीप्ततपसमाश्रमस्थमकल्मषं ॥ २८ ॥
अपश्यत्सा वनं रम्यं तैः सार्द्धं नन्दनोपमं ।
पुण्यं पद्मवनोपेतं शाखामृगगणाकुलं ॥ २९ ॥
सर्वर्तुफलभाराढ्यान्सर्वर्तुकुसुमोज्ज्वलान् ।
अपश्यत्पादपांश्चैव विहङ्गरुतनादितान् ॥ ३० ॥
आम्रानाम्रातकान्भव्यान्नारिकेलान्सतिन्दुकान् ।
चूतान्विल्वांस्तथा जम्बून्दाडिमान्वीजपूरकान् ॥ ३१ ॥
पारावतांस्तथा कोलांस्तथान्यानम्लवेतसान् ।
शालांस्तालांस्तमालांश्च सप्तपर्णांश्च चम्पकान् ॥ ३२ ॥
भल्लातकानामलकान्हरीतकविभीतकान् ।
अन्यांश्च पादपान्श्रेष्ठानपश्यत्फलपुष्पितान् ॥ ३३ ॥
चकोरैः शतपत्रैश्च भृङ्गराजैस्तथा शुकैः ।

कोकिलैः कलविङ्कैश्च हारितैर्जीवजीवकैः ॥ ३४ ॥
प्रियपुत्रैश्चातकैश्च तथान्यैर्विविधैः खगैः ।
श्रोत्ररम्यं सुमधुरं कूजद्भिः परिवेष्टितान् ॥ ३५ ॥
सरांसि च मनोज्ञानि प्रसन्नसलिलानि च ।
कुमुदैः पुण्डरीकैश्च आचितानि समन्ततः ॥ ३६ ॥
एवं दृष्ट्वा वनं रम्यं तैः सार्द्धं परमाद्भुतं ।
इन्द्रेण प्रेषिता हन्तुं तपस्तस्य महात्मनः ॥ ३७ ॥
प्रोवाच कामं वायुं च वसन्तं च द्विजोत्तमाः ।
कुरुध्वं मम साहाय्यं सर्वे यूयं पृथक्पृथक् ॥ ३८ ॥
एवमुक्ता तदा सा तु तथेत्युक्ता सुरैस्ततः ।
प्रत्युवाचाद्य यास्यामि यत्रासौ संस्थितो मुनिः ॥ ३९ ॥
अद्य तं देहयन्तारं प्रयुक्तेन्द्रियवाजिनं ।
चलच्छास्त्रं चलद्रश्मिं करिष्यामि कुसारथिं ॥ ४० ॥
ब्रह्मा जनार्दनो वापि यदिवा नीललोहितः ।
तथाप्यद्य करिष्यामि कामवाणकृतान्तरं ॥ ४१ ॥
इत्युक्त्वा प्रजगामाथ यत्रासौ तिष्ठते मुनिः ।
महातपःप्रभावेण प्रशान्तश्वापदाश्रमे ॥ ४२ ॥
सा पुंस्कोकिलमाधुर्यं नदीतीरे व्यवस्थिता ।
स्तोत्रमल्लास्थिता तस्मिन्नगायत वराप्सराः ॥ ४३ ॥
तावद्वसन्तः सहसा वसन्तमकरोत्तदा ।
कोकिलालापमधुरमकालिकमनोहरं ॥ ४४ ॥
ववौ गन्धवहश्चैव मलयाद्रिनिकेतनः ।

उच्चावचानि पुष्पाणि पातयंश्च पुनः पुनः ॥ ४५ ॥
पुष्पबाणधरश्चैव गत्वा तस्य समीपतः ।
मुनिं संक्षोभयामास स कामस्तस्य मानसं ॥ ४६ ॥
ततो गीतध्वनिं श्रुत्वा मुनिर्विस्मयमागतः ।
जगाम यत्र सा सुभ्रूः कामबाणप्रपीडितः ॥ ४७ ॥
दृष्ट्वा तामहसहृष्टो विस्मयोत्फुल्ललोचनः ।
भ्रष्टोत्तरीयो विकलः पुलकाञ्चितविग्रहः ॥ ४८ ॥

मुनिरुवाच ॥

कासि कस्यासि सुश्रोणि सुभगे चारुहासिनि ।
मनो हरसि मे सुभ्रु ब्रूहि सत्यं सुमध्यमे ॥ ४९ ॥

प्रम्लोचोवाच ॥

तव कर्मकरा चाहं पुष्पार्थं च समागता ।
आदेशं देहि मे क्षिप्रं किं करोमि तवाज्ञया ॥ ५० ॥

व्यास उवाच ॥

श्रुत्वैवं वचनं तस्यास्त्यक्त्वा धैर्यं विमोहितः ।
आदाय हस्ते तां बालां प्रविवेश स्वमाश्रमं ॥ ५१ ॥
ततः कामश्च वायुश्च वसन्तश्च द्विजोत्तमाः ।
जग्मुर्यथागताः सर्वे कृतकृत्यास्त्रिविष्टपं ॥ ५२ ॥
शशंसुश्च हरिं गत्वा तस्यास्तस्य च चेष्टितं ।
स्तुत्वा शक्रं ततो देवाः प्रीताः सुमनसो ऽभवन् ॥ ५३ ॥
स च कण्डुस्तया सार्द्धं प्रविशन्नेव चाश्रमं ।
आत्मनः परमं रूपं चाकरोन्मन्मथाकृति ॥ ५४ ॥

रूपयौवनसंपन्नमतीव सुमनोहरं ।
दिव्यालंकारसंयुक्तं द्विरष्टवरिषाकृति ॥ ५५ ॥
दिव्यवस्त्रधरं कान्तं दिव्यस्रग्गन्धभूषितं ।
सर्वोपभोगसंपन्नं सहसा तपसो बलात् ॥ ५६ ॥
दृष्ट्वा सा तस्य तद्रूपं परं विस्मयमागता ।
अहो अस्य तपोवीर्यमित्युक्त्वा मुदिता बभौ ॥ ५७ ॥
स्नानं संध्यां जपं होमं स्वाध्यायं देवतार्चनं ।
व्रतोपवासनियमं ध्यानं च मुनिसत्तमाः ॥ ५८ ॥
त्यक्त्वा स रेमे मुदितस्तया सार्द्धमहर्निशं ।
मन्मथाविष्टहृदयो बुबुधे न तपःक्षयं ॥ ५९ ॥
संध्यां रात्रिं दिनं पक्षं मासर्त्वयनहायनं ।
न बुबोध गतं कालं विषयासक्तमानसः ॥ ६० ॥
सा च तं कामजैर्भावैर्विदग्धा रहसि द्विजाः ।
रमयामास सुश्रोणी प्रचारकुशला तदा ॥ ६१ ॥
एवं कण्डुस्तया सार्द्धं वर्षाणामधिकं शतं ।
अतिष्ठन्मन्दरे द्रोण्यां ग्राम्यधर्मरतो मुनिः ॥ ६२ ॥
सा तं प्राह महाभागं गन्तुमिच्छाम्यहं दिवं ।
प्रसादसुमुखो ब्रह्मन्ननुज्ञातुं त्वमर्हसि ॥ ६३ ॥
तयैवमुक्तः स मुनिस्तस्यामासक्तमानसः ।
दिनानि कतिचिद्भद्रे स्थीयतामित्यभाषत ॥ ६४ ॥
एवमुक्ता ततस्तेन साग्रं वर्षशतं पुनः ।
बुभुजे विषयांस्तन्वी तेन सार्द्धं महात्मना ॥ ६५ ॥

पुनर्गते वर्षशते साधिके सा शुभानना ।
यामीत्याह दिवं ब्रह्मन्प्रणयात्स्मितशोभिनी ॥ ६६ ॥
उक्तस्तयैवं स मुनिरुपगृह्यायतेक्षणां ।
इहास्यतां क्षणं सुभ्रु चिरकालं गमिष्यसि ॥ ६७ ॥
तथा प्रतीता सुश्रोणी सह तेनर्षिणा पुनः ।
शतद्वयं किंचिदूनं वर्षाणामन्वतिष्ठत ॥ ६८ ॥
गमनाय महाभागो देवराजनिवेशनं ।
प्रोक्तः प्रोक्तस्तया तन्व्या स्थीयतामित्यभाषत ॥ ६९ ॥
तं शापभयभीरुश्च दाक्षिण्येन च दक्षिणा ।
प्रोक्ता प्रणयभङ्गार्त्तिवेदिनी न जहौ मुनिं ॥ ७० ॥
तया च रमतस्तस्य परमर्षेरहर्निशं ।
नवं नवमभूत्प्रेम मन्मथासक्तचेतसः ॥ ७१ ॥
एकदा तु त्वरायुक्तो निश्चक्रामोटजान्मुनिः ।
निष्क्रान्तमेव कुत्रेति गम्यते प्राह सा शुभा ॥ ७२ ॥
इत्युक्तः स तया प्राह परिवृत्तमहः शुभे ।
संध्योपास्तिं करिष्यामि क्रियालोपो ऽन्यथा भवेत् ॥ ७३ ॥
ततः प्रहस्य मुदिता सा तं प्राह महामुनिं ।
किमद्य सर्वधर्मज्ञ परिवृत्तमहस्तव ॥ ७४ ॥

मुनिरुवाच ॥

प्रातस्त्वमागता भद्रे नदीतीरमिदं शुभं ।
मया दृष्टासि सुश्रोणि प्रविष्टा च ममाश्रमं ॥ ७५ ॥
इयं च वर्तते संध्या परिणाममहर्गतं ।

अत्र हासः किमर्थो ऽयं सद्भावः कथ्यतां मम ॥ ७६ ॥

प्रम्लोचोवाच ॥

प्रत्यूषस्यागता ब्रह्मन् सत्यमेतन्न ते मृषा ।
किंत्वद्य तस्य कालस्य गतान्यब्दशतानि वै ॥ ७७ ॥

व्यास उवाच ॥

ततः ससाध्वसो विप्रस्तां पप्रच्छायतेक्षणां ।
कथ्यतां भीरु कः कालो गतो मे रमतस्त्वया ॥ ७८ ॥

प्रम्लोचोवाच ॥

सप्तोत्तराण्यतीतानि नव वर्षशतानि वै ।
षण्मासाश्च तथैवान्यत्समतीतं दिनत्रयं ॥ ७९ ॥

मुनिरुवाच ॥

सत्यं भीरु वदस्येतत्परिहासो ऽथवा तव ।
दिनमेकमहं मन्ये त्वया सार्द्धमिहोषितं ॥ ८० ॥

प्रम्लोचोवाच ॥

वदिष्याम्यनृतं ब्रह्मन्कथमत्र तवान्तिके ।
विशेषेणापि भवता पृष्टा धर्मानुवर्तिना ॥ ८१ ॥

व्यास उवाच ॥

निशम्य तद्वचस्तस्याः स मुनिर्द्विजसत्तमाः ।
धिग्धिङ्मामित्यथोवाच विनिन्द्यात्मानमात्मना ॥ ८२ ॥

मुनिरुवाच ॥

तपांसि मम नष्टानि भ्रष्टो ब्रह्मविदां वरः ।
हृतो विवेकः केनापि योषिन्मोहाय निर्मिता ॥ ८३ ॥

ऊर्मिषट्कातिगं ब्रह्म ज्ञेयमात्मजयेन मे ।
गतिरेषा कृता येन धिक्तं काममहाग्रहं ॥ ८४ ॥
व्रतानि मम वेदाप्तिः करणान्यखिलानि च ।
नरकग्राममार्गेण सङ्गेनापकृतानि मे ॥ ८५ ॥

व्यास उवाच ॥

विनिन्द्येत्थं स धर्मज्ञः स्वयमात्मानमात्मना ।
तामप्सरसमासीनामिदं वचनमब्रवीत् ॥ ८६ ॥

मुनिरुवाच ॥

गच्छ पापे यथाकामं यत्कार्यं तत्त्वया कृतं ।
देवराजस्य मत्क्षोभं कुर्वन्त्या भावचेष्टितैः ॥ ८७ ॥
न त्वां करोम्यहं भस्म क्रोधतीव्रेण वह्निना ।
सतां साप्तपदं मैत्रमुषितो ऽहं त्वया सह ॥ ८८ ॥
अथवा तव दोषः कः किं वा कुर्यामहं तव ।
ममैव दोषो नितरां येनाहमजितेन्द्रियः ॥ ८९ ॥
यथाशक्ति कृतार्थिन्या कृतो मत्तपसो व्ययः ।
त्वया नियुक्तया देवैर्मम योगबलार्दितैः ॥ ९० ॥

व्यास उवाच ॥

यावदित्थं स विप्रर्षिरब्रवीत्तां सुमध्यमां ।
तावच्चलत्स्वेदजला सा बभूवातिवेपथुः ॥ ९१ ॥
प्रवेपमानां सततं स्विन्नगात्रलतां स तां ।
गच्छ गच्छेति स क्रोधादुवाच मुनिसत्तमः ॥ ९२ ॥
सा तु निर्भर्त्सिता तेन विनिष्क्रम्य तदाश्रमात् ।

आकाशगामिनी स्वेदं ममार्ज तरुपल्लवैः ॥ १३ ॥
वृक्षाद्वृक्षं ययौ बाला तदग्रारुणपल्लवैः ।
निर्ममार्ज च गात्राणि गलत्स्वेदजलानि वै ॥ १४ ॥
ऋषिणा यस्तदा गर्भस्तस्या देहे समाहितः ।
निर्जगाम स रोमाञ्चस्वेदरूपी तदङ्गतः ॥ १५ ॥
सोमेनाप्यायितो गोभिः शतधा ववृधे शनैः ।
मारिषा नाम कन्याभूद्वृक्षाणां चारुलोचना ॥ १६ ॥
प्राचेतसानां सा भार्या दक्षस्य जननी द्विजाः ॥ १७ ॥

इति श्रीब्रह्मपुराणे गौतमीमाहात्म्ये स्वयंभ्वृषिसंवादे कण्डूपाख्यानं ॥

## अथ श्रीरामायण ऋष्यशृङ्गोपाख्यानं ॥

इति पृष्टः सुमन्त्रस्तदाख्यातुमुपचक्रमे ।
आनीत ऋष्यशृङ्गोऽसौ येनोपायेन मन्त्रिभिः ॥ १ ॥
लोमपादममात्यास्त इदमूचुर्महीपते ।
उपायो निरपायोऽयमस्माभिः परिचिन्तितः ॥ २ ॥
ऋष्यशृङ्गो वनचरस्तपस्येकरसे रतः ।
अनभिज्ञः स नारीणां विषयाणां सुखस्य च ॥ ३ ॥
इन्द्रियार्थैरभिमतैर्नरचित्तप्रहारिभिः ।

लोभयित्वाभ्युपायेन शीघ्रमानीयतां वनात् ॥ ४ ॥
नावः सुचित्राः कल्प्यन्तां नानाकृत्रिमवृक्षकाः ।
पूपपक्वा लड्डुफला मधुदुग्धघृतस्रवाः ॥ ५ ॥
कृत्रिमानि फलान्यत्र घृतखण्डयुतानि च ।
नानास्वादूनि मिष्टानि सुगन्धीनि बहून्यपि ॥ ६ ॥
तत्र कृत्रिमवृक्षाश्च नानापक्षिसमन्विताः ।
सुगन्धपुष्पधरणा नानावस्त्रसमावृताः ॥ ७ ॥
एवंविधासु नौकासु तिष्ठन्तु वरयोषितः ।
यौवनोन्मत्तनयनाः सर्वाः सर्वाङ्गशोभनाः ॥ ८ ॥
गीतवदित्रकुशला नृत्येषु कुशलास्तथा ।
उपायज्ञाः कलाज्ञाश्च वैशिके परिनिष्ठिताः ॥ ९ ॥
मुनिवेशपरिछन्नास्तत्र गच्छन्तु योषितः ।
रहस्युपेत्य ता एनमानयन्तु शुभव्रतं ॥ १० ॥
श्रुत्वा तथेति तान्राजा प्रत्युवाच विचारयन् ।
मन्त्रिभिः सहितश्चैव तदा स कृतवांस्तथा ॥ ११ ॥
वारमुख्यास्तथा वेश्याः गत्वा तन्निर्जनं वनं ।
नातिदूरे तदा तस्थुराश्रमस्य महामुनेः ॥ १२ ॥
तस्य संदर्शनार्थिन्य ऋषिपुत्रस्य धीमतः ।
विभाण्डकभयोद्विग्ना वनगुल्मलतावृताः ॥ १३ ॥
चारयित्वा तु तमृषिमाश्रमादभिनिर्गतं ।
तस्य संदर्शने तस्थुर्ऋषिपुत्रान्तिके ततः ॥ १४ ॥
चित्रं संक्रीडमानास्ताः क्रीडनैर्विविधैस्तदा ।

कन्दुकैश्चैव गायन्त्यः क्रीडन्त्यः प्लुतवल्गितैः ॥ १५ ॥
मदविह्वलिताः काश्चित्प्रपतन्त्युत्पतन्ति च ॥ १६ ॥
नयनभ्रूविकारैश्च हस्तैरम्बुजसंनिभैः ।
संज्ञाश्च ताः प्रकुर्वन्त्यः पुंसां हर्षविवर्धनाः ॥ १७ ॥
नूपुरशिञ्जितरवैः कोकिलाभिरुतेन च ।
गन्धर्वनगरप्रख्यं प्रगीतमिव तद्वनं ॥ १८ ॥
धूयमानैश्च वासोभिः श्लक्ष्णैरङ्गदभूषणैः ।
परस्परं विनिघ्नन्त्यः शोभन्ते ललितेन च ॥ १९ ॥
कामसंजननार्थाय ऋषिपुत्रस्य धीमतः ।
सर्वतः प्रकिरन्ति स्म ललमाना वराङ्गनाः ॥ २० ॥
अभूतपूर्वं तद्दृष्ट्वा विस्मितः साध्वसं गतः ।
निश्चक्रामाश्रमात्तूर्णमृष्यशृङ्ग ऋषेः सुतः ॥ २१ ॥
न तेन जन्मप्रभृति दृष्टपूर्वास्तथाविधाः ।
नार्यो वा पुरुषा वान्ये पुरराष्ट्रनिवासिनः ॥ २२ ॥
स तं देशमुपागम्य जातकौतूहलस्तदा ।
विभाण्डकसुतो राजंस्तस्थौ परमविस्मितः ॥ २३ ॥
ताश्च तं विस्मितं दृष्ट्वा जगुः कलपदान्तरं ।
गीतं मधुरभाषिण्यो जहसुश्चायतेक्षणाः ॥ २४ ॥
अब्रुवंश्चैनमभ्यासमागम्य मदविह्वलाः ।
को ऽसि कस्य सुतश्च त्वं त्वरावान्समुपागतः ॥ २५ ॥
एकश्च विजने ऽरण्ये कस्माच्चरसि शंस नः ।
ज्ञातुं त्वां वयमिच्छामस्तत्त्वमाचक्ष्व नः प्रभो ॥ २६ ॥

अदृष्टपूर्वास्ता दृष्ट्वा काम्यरूपास्ततः स्त्रियः ।
ऋषिपुत्रस्तदात्मानमाख्यातुमुपचक्रमे ॥ २७ ॥
पिता विभाण्डको नाम महर्षिः काश्यपोत्तमः ।
तस्याहमौरसः पुत्र ऋष्यशृङ्ग इति श्रुतः ॥ २८ ॥
आश्रमो ऽयमिहास्माकं स्वादुमूलफलान्वितः ।
करिष्ये तत्र पूजां वः सर्वेषामभिगम्यतां ॥ २९ ॥
ऋषिपुत्रवचः श्रुत्वा तासां मतिरजायत ।
तदाश्रमपदं द्रष्टुं प्रजग्मुः सहितास्ततः ॥ ३० ॥
तासां पूजां ततः चक्रे ऋष्यशृङ्ग ऋषेः सुतः ।
पाद्यार्घ्यासनदानेन स्वादुमूलफलेन च ॥ ३१ ॥
प्रतिगृह्य तु तां पूजां सर्वास्ताः परिशङ्किताः ।
ऋषेः शापभयोद्विग्ना गमनाय मनो दधुः ॥ ३२ ॥
ऊचुश्चैनं सुमधुरं ता हसन्त्य इदं वचः ॥ ३३ ॥
अस्माकमप्यृषेः पुत्र स्वादूनीमानि भक्षय ।
फलान्याश्रमजातानि यदि ते रोचते ऽनघ ॥ ३४ ॥
अथास्मै प्रददुः स्वादून्मोदकान्फलसंनिभान् ।
अन्यांश्च विविधान्भक्ष्यान्मधूनि मधुराणि च ॥ ३५ ॥
तीर्थोदकमिदं तावत्पीयतामिति सुव्रत ।
परिषस्वजिरे चैनं हसन्त्यो मदविह्वलाः ॥ ३६ ॥
परिपस्पृशिरे चैनं पीनैरुरसिजैर्मुहुः ।
श्रोत्रमूले चोपजेपुर्वदनैर्मधुगन्धिभिः ॥ ३७ ॥
सो ऽमन्यत फलानीति मोदकांस्तान्सुवर्तितान् ।

भक्ष्यांश्चास्वाद्य विविधान्फलाकारान्सुयोजितान् ॥ ३८ ॥
अनास्वादितपूर्वाणि फलान्यास्वाद्य तानि सः ।
मधूनि च सुगन्धीनि पीत्वा प्रमुदितो ऽभवत् ॥ ३९ ॥
सुकुमारैश्च तैरङ्गैस्ताभिः स्पृष्टो व्यमुह्यत ।
स्पृहयामास तासां च स्पर्शस्य ललितस्य च ॥ ४० ॥
अथापृच्छ्य मुनेः पुत्रं ताः स्त्रियः प्रययुस्ततः ।
स्वमाश्रमपदं नाम व्यपदिश्याविदूरतः ॥ ४१ ॥
तासु प्रतिगतास्वेव ऋष्यशृङ्गः समुत्सुकः ।
तद्गतेनैव मनसा न निद्रामध्यगच्छत ॥ ४२ ॥
अथाजगाम भगवान्काश्यपः स्वं निवेशनं ।
ध्यायमानं च तं दृष्ट्वा ऋष्यशृङ्गं समुत्सुकं ॥ ४३ ॥
पप्रच्छ काश्यपः पुत्रं कस्मान्मां नाभिनन्दसि ।
चिन्तासागरमध्यस्थमद्य त्वां तात लक्षये ॥ ४४ ॥
न ह्यीदृशं तापसानां रूपं भवति कर्हिचित् ।
शीघ्रमाचक्ष्व मे पुत्र किमिदं वैकृतं कृतं ॥ ४५ ॥
एवमुक्तः काश्यपेन प्रोवाच पितरं तदा ।
भगवन्निह मे दृष्टास्तापसाः शुभलोचनाः ॥ ४६ ॥
सुकुमारैरुरसिजैः पीनैरत्यद्भुतोपमैः ।
परिपस्पृशिरे मां च गाढमालिङ्ग्य सर्वशः ॥ ४७ ॥
गायन्ति सुकुमाराणि मनोज्ञानि मुहुर्मुहुः ।
क्रीडन्ति चाद्भुताकारैर्नयनभ्रूविचेष्टितैः ॥ ४८ ॥
अब्रवीद्भगवान्श्रुत्वा ऋष्यशृङ्गवचस्तदा ॥ ४९ ॥

रक्षांस्येतेन रूपेण तपसो नाशनाय वै ।
विश्रम्भस्ते न कर्तव्यस्तेषु पुत्र कथंचन ॥ ५० ॥
एवमुक्त्वा ऋष्यशृङ्गं समाश्वास्य च काश्यकः ।
उषित्वा रजनीमेकामरण्यं स जगाम ह ॥ ५१ ॥
अथापरेद्युस्तं देशमाजगाम पुनस्त्वरन् ।
मनोज्ञरूपास्ता यत्र दृष्टा वै चारुमध्यमाः ॥ ५२ ॥
ताश्च दृष्ट्वैव दूरात्तमायान्तं काश्यपात्मजं ।
प्रत्युद्गम्याब्रुवन्वाक्यं प्रहसन्त्य इदं तदा ॥ ५३ ॥
एह्याश्रमपदं रम्यं पश्यास्माकमपि प्रभो ।
तत्र पूजामवाप्याग्र्यां पुनरभ्यागमिष्यसि ॥ ५४ ॥
श्रुत्वैतद्वचनं तासां स्त्रीणामतिमनोहरं ।
गमनाय मतिं चक्रे ताश्चैनं निन्युरङ्गनाः ॥ ५५ ॥
आनीयमान एवाथ तस्मिन्नृषिसुते ततः ।
प्रववर्ष तदा देवस्तस्य राष्ट्रे महीपतेः ॥ ५६ ॥
विभाण्डकश्च विपिनादाजगाम स्वमालयं ।
वन्यं मूलफलं प्राप्य भारार्त्तः सोऽविशत्तदा ॥ ५७ ॥
शून्यमावसथं दृष्ट्वा पुत्रदर्शनलालसः ।
परिश्रान्तस्तथैवासावकृत्वा पादधावनं ॥ ५८ ॥
चुक्रोश ऋष्यशृङ्गेति सर्वतः प्रविलोकयन् ।
न चापश्यत्सुतं तत्र काश्यपो भगवानृषिः ॥ ५९ ॥
निष्क्रम्य च वनात्तस्माद्ग्रामं ददर्श काश्यपः ।
ग्रामांश्च परिपप्रच्छ गोकुलानि च सर्वशः ॥ ६० ॥

कस्यैव विषयः सौम्यो ग्रामाश्च बहुगोधनाः ॥ ६१ ॥
ऋषेर्वचनमाज्ञाय सर्वे ते गोषु जीविनः ।
कृताञ्जलिपुटा भूत्वा विनयेनाचचक्षिरे ॥ ६२ ॥
अङ्गेषु प्रथितो राजा लोमपाद इति श्रुतः ॥ ६३ ॥
तेनाभिसृष्टा ब्रह्मर्षे ग्रामा ह्येते सगोकुलाः ।
पूजार्थमृष्यशृङ्गस्य विभाण्डकसुतस्य वै ॥ ६४ ॥
एवमुक्तस्तु स ऋषिर्दृष्ट्वा वै ध्यानचक्षुषा ।
भविष्यमेव तज्ज्ञात्वा प्रीतात्मा संन्यवर्तत ॥ ६५ ॥
ऋषिपुत्रोऽपि धर्मात्मा नौयानवरमास्थितः ।
महाजलौघवर्षेण राजधानीमुपाययौ ॥ ६६ ॥
वर्षेणैवागतं विप्रं स हि मत्वा नराधिपः ।
प्रत्युद्गम्यार्चयांचक्रे शिरसा च महीं ययौ ॥ ६७ ॥
अर्घ्यं च प्रददावस्मै पुरस्कृत्य पुरोहितं ।
सान्तःपुरजनश्चैनं प्रपेदे शान्त्वयन्निव ॥ ६८ ॥
महार्हैश्चेप्सितैर्भोगैर्युयोजैनं प्रसादयन् ।
स्वयं चोपचचारैनं मन्युर्मास्येह भूदिति ॥ ६९ ॥
तदा कन्यां ददावस्मै भार्यां कमललोचनां ।
शान्तां शान्तेन मनसा दत्वा हर्षमवाप च ॥ ७० ॥
एवं संन्यवसत्तत्र सर्वकामैः सुपूजितः ।
ऋष्यशृङ्गो महातेजाः शान्तया सह भार्यया ॥ ७१ ॥

इति श्रीरामायणे ऋष्यशृङ्गोपाख्यानं समाप्तं ॥

## अथ श्रीमहाभारते पुरुषकाराख्यानं ॥

भीष्म उवाच ॥

देवमानुषयोः किं स्वित्कर्मणोः श्रेय उच्यते ।
पुरा वसिष्ठो भगवान्पितामहमपृच्छत ॥ १ ॥
ततः पद्मोद्भवो राजन्देवदेवः पितामहः ।
उवाच मधुरं वाक्यमर्थवद्धेतुभूषितं ॥ २ ॥

ब्रह्मोवाच ॥

नावीजं जायते किंचिन्न वीजेन विना फलं ।
वीजाद्वीजं प्रभवति वीजादेव फलं स्मृतं ॥ ३ ॥
यादृशं वपते वीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वापि तादृशं दृश्यते फलं ॥ ४ ॥
यथा वीजं विना क्षेत्रमुप्तं भवति निष्फलं ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥ ५ ॥
क्षेत्रं पुरुषकारस्तु दैवं वीजमुदाहृतं ।
क्षेत्रवीजसमायोगात्ततः शस्यं समृध्यते ॥ ६ ॥
कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः ।
प्रत्यक्षं दृश्यते लोके कृतस्यापकृतस्य च ॥ ७ ॥
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित् ॥ ८ ॥
कृती सर्वत्र लभते प्रतिष्ठां भाग्यसंयुतां ।
अकृती लभते भ्रष्टः क्षते क्षारावसेचनं ॥ ९ ॥

तपसा रूपसौभाग्यं रत्नानि विविधानि च ।
प्राप्यते कर्मणा सर्वं न दैवादकृतात्मना ॥ १० ॥
तथा स्वर्गश्च भोगाश्च निष्ठा या च मनीषिता ।
सर्वं पुरुषकारेण कृतेनेहोपलभ्यते ॥ ११ ॥
ज्योतींषि त्रिदशा नागा यक्षाश्चन्द्रार्कमारुताः ।
सर्वे पुरुषकारेण मानुष्याद्देवतां गताः ॥ १२ ॥
अर्थो वा मित्रवर्गो वा ऐश्वर्यं वा कुलान्वितं ।
श्रीश्चापि दुर्लभा भोक्तुं तथैवाकृतकर्मभिः ॥ १३ ॥
शौचेन लभते विप्रः क्षत्रियो विक्रमेण तु ।
वैश्यः पुरुषकारेण शूद्रः शुश्रूषया श्रियं ॥ १४ ॥
नादातारं भजन्त्यर्था न क्लीबं नातिनिष्क्रियं ।
नाकर्मशीलं नाशूरं तथा नैवातपस्विनं ॥ १५ ॥
येन लोकास्त्रयः सृष्टा दैत्याः सर्वाश्च देवताः ।
स एष भगवान्विष्णुः समुद्रे तप्यते तपः ॥ १६ ॥
स्वं चेत्कर्मफलं न स्यात्सर्वमेवाफलं भवेत् ।
लोको दैवं समालम्ब्य उदासीनो भवेन्ननु ॥ १७ ॥
अकृत्वा मानुषं कर्म यो दैवमनुवर्तते ।
वृथा श्राम्यति संप्राप्य पतिं क्लीबमिवाङ्गना ॥ १८ ॥
न तथा मानुषे लोके भयमस्ति शुभाशुभे ।
यथा त्रिदशलोकेषु भयमन्येन जायते ॥ १९ ॥
कृतः पुरुषकारस्तु दैवमेवानुवर्तते ।
न दैवमकृते किंचित्कस्यचिद्दातुमर्हति ॥ २० ॥

यथा स्थानान्यनित्यानि दृश्यन्ते दैवतेष्वपि ।
कथं कर्म विना दैवं स्थास्यति स्थापयिष्यते ॥ २१ ॥
न दैवतानि लोकेऽस्मिन्व्यापारं यान्ति कस्यचित् ।
व्यासङ्गं जनयन्त्युग्रमात्माभिभवशङ्कया ॥ २२ ॥
ऋषीणां देवतानां च सदा भवति विग्रहः ।
एवं त्रिदशलोकेऽपि प्राप्यन्ते बहवो गुणाः ॥ २३ ॥
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मैव ह्यात्मनः साक्षी कृतस्याप्यकृतस्य वा ॥ २४ ॥
कृतं चाप्यकृतं किंचित्कृते कर्मणि सिध्यति ।
सुकृतं दुष्कृतं कर्म न यथार्थं प्रपद्यते ॥ २५ ॥
देवानां शरणं पुण्यं सर्वं पुण्यैरवाप्यते ।
पुण्यशीलं नरं प्राप्य किं दैवं प्रकरिष्यति ॥ २६ ॥
पुरा ययातिर्विभ्रष्टश्च्यावितः पतितः क्षितौ ।
पुनरारोपितः स्वर्गं दौहित्रैः पुण्यकर्मभिः ॥ २७ ॥
अश्वमेधादिभिर्यज्ञैः सत्कृतः कोशलाधिपः ।
महर्षिशापात्सौदासः पुरुषादत्वमागतः ॥ २८ ॥
वसुर्यज्ञशतैरिष्ट्वा द्वितीय इव वासवः ।
मिथ्याभिधानेनैकेन रसातलतलं गतः ॥ २९ ॥
शक्रस्योद्गम्य चरणं प्रस्थितो जनमेजयः ।
द्विजस्त्रीणां वधं कृत्वा किं दैवेन न वारितः ॥ ३० ॥
अज्ञानाद्ब्राह्मणं हत्वा स्पृष्टो बालवधेन च ।
वैशम्पायनविप्रर्षिः किं दैवेन न वारितः ॥ ३१ ॥

गोप्रदानेन मिथ्या च ब्राह्मणेभ्यो महामखे ।
पुरा नृगश्च राजर्षिः कृकलासत्वमागतः ॥ ३२ ॥
पाण्डवानां हृतं राज्यं धार्तराष्ट्रैर्महाबलैः ।
पुनः प्रत्याहृतं चैव न दैवाद्भुजसंश्रयात् ॥ ३३ ॥
तपोनियमसंयुक्ता मुनयो संशितव्रताः ।
किं ते दैवबलाच्छापमुत्सृजन्ते न कर्मणा ॥ ३४ ॥
पापमुत्सृजते लोके सर्वं प्राप्य सुदुर्लभं ।
लोभमोहसमापन्नं न दैवं त्रायते नरं ॥ ३५ ॥
यथाग्निः पवनैर्धूतः सूक्ष्मो ऽपि सुमहान्भवेत् ।
तथा कर्मसमायुक्तं दैवं साधु विवर्धते ॥ ३६ ॥
यथा तैलक्षयाद्दीपः प्रह्रासमुपगच्छति ।
तथा कर्मक्षयाद्दैवं प्रह्रासमुपगच्छति ॥ ३७ ॥
विपुलमपि धनौघं प्राप्य भोगान्स्त्रियो वा
पुरुष इह न शक्तः कर्महीनो हि भोक्तुं ।
सुनिहितमपि चार्थं दैवतैरक्ष्यमाणं
पुरुष इह महात्मा प्राप्नुते नित्ययुक्तः ॥ ३८ ॥
व्ययगुणमपि साधुं कर्मणा संश्रयन्ते
बहुतरसुसमृद्धा मानुषाणां गृहाणि ।
भवति मनुजलोकाद्देवलोको विशिष्टः
पितृवनभवनाभं दृश्यते चामराणां ॥ ३९ ॥
न च फलति विकर्मा जीवलोके न दैवं
व्यपनयति विमार्गं नास्ति दैवे प्रभुत्वं ।

गुरुमिव कृतमग्र्यं कर्म संयाति दैवं
नयति पुरुषकारः संचितस्तत्र तत्र ॥ ४० ॥
एतत्ते सर्वमाख्यातं मया वै मुनिसत्तम ।
फलं पुरुषकारस्य सदा संदृश्य तत्त्वतः ॥ ४१ ॥
अभ्युत्थानेन दैवस्य समारब्धेन कर्मणा ।
विधिना कर्मणा चैव स्वर्गमार्गमवाप्नुयात् ॥ ४२ ॥

युधिष्ठिर उवाच ॥

कर्मणां च समस्तानां शुभानां भरतर्षभ ।
फलानि भरतश्रेष्ठ प्रब्रूहि परिपृच्छतः ॥ ४३ ॥

भीष्म उवाच ॥

हन्त ते कथयिष्यामि यन्मां पृच्छसि भारत ।
[रहस्यं यदृषीणां तु तच्छृणुष्व युधिष्ठिर]
या गतिः प्राप्यते येन प्रेत्यभावे चिरेप्सिता ॥ ४४ ॥
येन येन शरीरेण यद्यत्कर्म करोति यः ।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ॥ ४५ ॥
यस्यां यस्यामवस्थायां यत्करोति शुभाशुभं ।
तस्यां तस्यामवस्थायां भुंक्ते जन्मनि जन्मनि ॥ ४६ ॥
न नश्यति कृतं कर्म सदा पञ्चेन्द्रियैरिह ।
ते ह्यस्य साक्षिणो नित्यं षष्ठ आत्मा तथैव च ॥ ४७ ॥
चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृतां ।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ॥ ४८ ॥
यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्तते ।

आत्तायादृष्टपूर्वाय तस्य पुण्यफलं महत् ॥ ४९ ॥
स्थण्डिलेषु शयानानां गृहाणि शयनानि च ।
चीरवल्कलसंवीते वासांस्याभरणानि च ॥ ५० ॥
वाहनानि च यानानि योगात्मनि तपोधने ।
अग्नीनुपशयानस्य राज्ञः पौरुषमेव च ॥ ५१ ॥
रसानां प्रतिसंहारे सौभाग्यमनुगच्छति ।
आमिषप्रतिसंहारे पशून्पुत्रांश्च विन्दति ॥ ५२ ॥
अवाक्शिरास्तु यो लम्बेदुदवासं च यो वसेत् ।
सततं चैकशायी यः स लभेतेप्सितां गतिं ॥ ५३ ॥
पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रितं ।
दद्यादतिथिपूजार्थं स यज्ञः पञ्चदक्षिणः ॥ ५४ ॥
वीरासनं वीरशय्यां वीरस्थानमुपागतः ।
अक्षयास्तस्य वै लोकाः सर्वकामगमास्तथा ॥ ५५ ॥
धनं लभेत दानेन मौनेनाज्ञां विशांपते ।
उपभोगांश्च तपसा ब्रह्मचर्येण जीवितं ॥ ५६ ॥
रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ।
फलमूलाशिनो राज्यं स्वर्गः पर्णाशिनां भवेत् ॥ ५७ ॥
प्रायोपवेशिनो राजन्सर्वत्र सुखमश्नुते ।
गवाढ्यः शाकदीक्षायां स्वर्गकामी तृणाशनः ॥ ५८ ॥
स्त्रियस्त्रिषवणं स्नात्वा वायुं पीत्वा क्रतुं लभेत् ।
स्वर्गं सत्येन लभते दीक्षया कुलमुत्तमं ॥ ५९ ॥
अधीत्य सर्ववेदान्वै सद्यो दुःखाद्विमुच्यते ।

मानसं हि चरन्धर्मं स्वर्गल्लोकमुपाश्नुते ॥ ६० ॥
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
यो ऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखं ॥ ६१ ॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरं ।
एवं पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ ६२ ॥
अचोद्यमानानि यथा पुष्पाणि च फलानि च ।
स्वकालं नातिवर्तन्ते तथा कर्म पुरा कृतं ॥ ६३ ॥
जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः ।
चक्षुःश्रोत्रे च जीर्येते तृष्णैका न तु जीर्यते ॥ ६४ ॥
येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः ।
प्रीणाति मातरं येन पृथिवी तेन पूजिता ॥ ६५ ॥
येन प्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितं ॥ ६६ ॥
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥ ६७ ॥

इति श्रीमहाभारते ऽनुशासनपर्वणि पुरुषकाराख्यानं ॥

---

## अथ श्रीमहाभारते ऽमृतमन्थनं ॥

### सौतिरुवाच ॥

ज्वलन्तमचलं मेरुं तेजोराशिमनुत्तमं ।
आक्षिपन्तं प्रभां भानोः स्वशृङ्गैः काञ्चनोज्ज्वलैः ॥ १ ॥

कनकाभरणं चित्रं देवगन्धर्वसेवितं ।
अप्रमेयमनाधृष्यमधर्मबहुलैर्जनैः ॥ २ ॥
व्यालैराचरितं घोरैर्दिव्यौषधिविदीपितं ।
नाकमावृत्य तिष्ठन्तमुच्छ्रयेण महागिरिं ॥ ३ ॥
अगम्यं मनसाप्यन्यैर्नदीवृक्षसमन्वितं ।
नानापतगसंघैश्च नादितं सुमनोहरैः ॥ ४ ॥
तस्य शृङ्गमुपारुह्य बहुरत्नाचितं शुभं ।
अनन्तकल्पमुद्विद्धं सुराः सर्वे महौजसः ॥ ५ ॥
ते मन्त्रयितुमारब्धास्तत्रासीना दिवौकसः ।
अमृताय समागम्य तपोनियमसंयुताः ॥ ६ ॥
तत्र नारायणो देवो ब्रह्माणमिदमब्रवीत् ।
चिन्तयत्सु सुरेष्वेवं मन्त्रयत्सु च सर्वशः ॥ ७ ॥
देवैरसुरसंघैश्च मथ्यतां कलशोदधिः ।
भविष्यत्यमृतं तत्र मथ्यमाने महोदधौ ॥ ८ ॥
सर्वौषधीः समावाप्य सर्वरत्नानि चैव हि ।
मथ्नध्वमुदधिं देवा वेत्स्यध्वममृतं ततः ॥ ९ ॥
ततोऽभ्रशिखराकारैर्गिरिशृङ्गैरलंकृतं ।
मन्दरं पर्वतवरं लताजालसमाकुलं ॥ १० ॥
नानाविहगसंघुष्टं नानादंष्ट्रिसमाकुलं ।
किन्नरैरप्सरोभिश्च देवैरपि च सेवितं ॥ ११ ॥
एकादशसहस्राणि योजनानां समुच्छ्रितं ।
अधो भूमेः सहस्रेषु तावत्स्वेव प्रतिष्ठितं ॥ १२ ॥

तमुद्धर्तुमशक्ता वै सर्वे देवगणास्तदा ।
विष्णुमासीनमभ्येत्य ब्रह्माणं चेदमब्रुवन् ॥ १३ ॥
भवन्तावत्र कुर्वातां बुद्धिं नैःश्रेयसीं परां ।
मन्दरोद्धरणे यत्नः क्रियतां च हिताय नः ॥ १४ ॥
तथेति चाब्रवीद्विष्णुर्ब्रह्मणा सह भार्गव ।
अचोदयदमेयात्मा फणीन्द्रं पद्मलोचनः ॥ १५ ॥
ततो ऽनन्तः समुत्थाय ब्रह्मणा परिचोदितः ।
नारायणेन चाप्युक्तस्तस्मिन्कर्मणि वीर्यवान् ॥ १६ ॥
अथ पर्वतराजानं तमनन्तो महाबलः ।
उज्जहार बलाद्ब्रह्मन्सवनं सवनौकसं ॥ १७ ॥
ततस्तेन सुराः सार्द्धं समुद्रमुपतस्थिरे ।
तमूचुरमृतस्यार्थे निर्मथिष्यामहे जलं ॥ १८ ॥
अपां पतिरथोवाच ममाप्यंशो भवेत्ततः ।
सोढास्मि विपुलं मर्दं मन्दरभ्रमणादिति ॥ १९ ॥
ऊचुश्च कूर्मराजानमकूपारे सुरासुराः ।
अधिष्ठानं गिरेरस्य भवान्भवितुमर्हति ॥ २० ॥
कूर्मेण तु तथेत्युक्त्वा पृष्ठमस्य समर्पितं ।
तं शैलं तस्य पृष्ठस्थं वज्रेणेन्द्रो न्यपीडयत् ॥ २१ ॥
मन्थानं मन्दरं कृत्वा तथा नेत्रं च वासुकिं ।
देवा मथितुमारब्धाः समुद्रं निधिमम्भसां ॥ २२ ॥
एकमन्तमुपाश्लिष्टा नागराज्ञो महासुराः ।
विबुधाः सहिताः सर्वे यतः पुच्छं ततः स्थिताः ॥ २३ ॥

अनन्तो भगवान्देवो यतो नारायणस्ततः ।
शिर उत्क्षिप्य नागस्य पुनः पुनरवाक्षिपत् ॥ २४ ॥
वासुकेरथ नागस्य सहसा क्षिप्यतः सुरैः ।
सधूमाः सार्चिषो वाता निष्पेतुरसकृन्मुखात् ॥ २५ ॥
ते धूमसंघाः संभूता मेघसंघाः सविद्युतः ।
अभ्यवर्षन्सुरगणान्श्रमसंतापकर्षितान् ॥ २६ ॥
तस्माच्च गिरिकूटाग्रात्प्रच्युताः पुष्पवृष्टयः ।
सुरासुरगणान्सर्वान्समन्तात्समवाकिरन् ॥ २७ ॥
बभूवात्र महानादो महामेघरवोपमः ।
उदधेर्मथ्यमानस्य मन्दरेण महासुरैः ॥ २८ ॥
तत्र नानाजलचरा विनिष्पिष्टा महाद्रिणा ।
विलयं समुपाजग्मुः शतशो लवणाम्भसि ॥ २९ ॥
वारुणानि च भूतानि विविधानि महीधरः ।
पातालतलवासीनि विलयं समुपानयत् ॥ ३० ॥
तस्मिंश्च भ्राम्यमाणेऽद्रौ संघृष्यन्तः परस्परं ।
न्यपतन्पतगोपेता पर्वताग्रान्महाद्रुमाः ॥ ३१ ॥
तेषां संघर्षजश्चाग्निरर्चिभिः प्रज्वलन्मुहुः ।
विद्युद्भिरिव नीलाभ्रमावृणोन्मन्दरं गिरिं ॥ ३२ ॥
ददाह कुञ्जरांस्तत्र सिंहांश्चैव विनिर्गतान् ।
विगतासूनि सर्वाणि सत्त्वानि विविधानि च ॥ ३३ ॥
तमग्निममरश्रेष्ठः प्रदहन्तमितस्ततः ।
वारिणा मेघजेनेन्द्रः शमयामास सर्वशः ॥ ३४ ॥

ततो नानाविधास्तत्र सुस्रुवुः सागराम्भसि ।
महाद्रुमाणां निर्यासा बहवश्चौषधीरसाः ॥ ३५ ॥
तेषाममृतवीर्याणां रसानां पयसैव च ।
अमरत्वं सुरा जग्मुः काञ्चनस्य च निस्रवात् ॥ ३६ ॥
ततस्तस्य समुद्रस्य तज्जातमुदकं पयः ।
रसोत्तमैर्विमिश्रं च ततः क्षीरादभूद्घृतं ॥ ३७ ॥
ततो ब्रह्माणमासीनं देवा वरदमब्रुवन् ।
श्रान्ताः स्मः सुभृशं ब्रह्मन्नोद्भवत्यमृतं च तत् ॥ ३८ ॥
विना नारायणं देवं सर्वे ऽन्ये देवदानवाः ।
चिरारब्धमिदं चापि सागरस्यापि मन्थनं ॥ ३९ ॥
ततो नारायणं देवं ब्रह्मा वचनमब्रवीत् ।
विधत्स्वैषां बलं विष्णो भवानत्र परायणं ॥ ४० ॥

विष्णुरुवाच ॥

बलं दधामि सर्वेषां कर्मैतद्ये समास्थिताः ।
क्षोभ्यतां कलशः सर्वैर्मन्दरः परिवर्त्यतां ॥ ४१ ॥

सौतिरुवाच ॥

नारायणवचः श्रुत्वा बलिनस्ते महोदधेः ।
तत्पयः सहिता भूयश्चक्रिरे भृशमाकुलं ॥ ४२ ॥
ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात् ।
प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः ॥ ४३ ॥
श्रीरनन्तरमुत्पन्ना घृतात्पाण्डरवासिनी ।
सुरादेवी समुत्पन्ना तुरगः पाण्डरस्तथा ॥ ४४ ॥

कौस्तुभस्तु मणिर्दिव्य उत्पन्नो घृतसंभवः ।
मरीचिविकचः श्रीमान्नारायण उरोगतः ॥ ४५ ॥
श्रीः सुरा चैव सोमश्च तुरगश्च मनोजवः ।
यतो देवास्ततो जग्मुरादित्यपथमाश्रिताः ॥ ४६ ॥
धन्वन्तरिस्ततो देवो वपुष्मानुदतिष्ठत ।
श्वेतं कमण्डलुं बिभ्रदमृतं यत्र तिष्ठति ॥ ४७ ॥
एतदत्यद्भुतं दृष्ट्वा दानवानां समुत्थितः ।
अमृतार्थे महान्नादो ममेदमिति जल्पतां ॥ ४८ ॥
श्वेतैर्दन्तैश्चतुर्भिस्तु महाकायस्ततःपरं ।
ऐरावणो महानागो ऽभवद्वज्रभृता धृतः ॥ ४९ ॥
अतिनिर्मथनादेव कालकूटस्तथापरः ।
जगदावृत्य सहसा सधूमो ऽग्निरिव ज्वलन् ॥ ५० ॥
त्रैलोक्यं मोहितं यस्य गन्धमाघ्राय तद्विषं ।
प्राग्रसल्लोकरक्षार्थं ब्रह्मणो वचनाच्छिवः ॥ ५१ ॥
दधार भगवान्कण्ठे मन्त्रमूर्तिर्महेश्वरः ।
तदा प्रभृति देवस्तु नीलकण्ठ इति श्रुतः ॥ ५२ ॥
एतत्तदद्भुतं दृष्ट्वा निराशा दानवाः स्थिताः ।
अमृतार्थे च लक्ष्म्यर्थे महान्तं वैरमास्थिताः ॥ ५३ ॥
ततो नारायणो मायां मोहिनीं समुपाश्रितः ।
स्त्रीरूपमद्भुतं कृत्वा दानवानभिसंश्रितः ॥ ५४ ॥
ततस्तदमृतं तस्मै ददुस्ते मूढचेतसः ।
स्त्रियै दानवदैतेयाः सर्वे तद्गतमनसाः ॥ ५५ ॥

अथावरणमुख्यानि नानाप्रहरणानि च ।
प्रगृह्याभ्यद्रवन्देवान्सहिता दैत्यदानवाः ॥ ५६ ॥
ततस्तदमृतं देवो विष्णुरादाय वीर्यवान् ।
जहार दानवेन्द्रेभ्यो नरेण सहितः प्रभुः ॥ ५७ ॥
ततो देवगणाः सर्वे पपुस्तदमृतं तदा ।
विष्णोः सकाशात्संप्राप्य संभ्रमे तुमुले सति ॥ ५८ ॥
ततः पिबत्सु तत्कालं देवेष्वमृतमीप्सितं ।
राहुर्विबुधरूपेण दानवः प्रापिबत्तदा ॥ ५९ ॥
तस्य कण्ठमनुप्राप्ते दानवस्यामृते तदा ।
आख्यातं चन्द्रसूर्याभ्यां सुराणां हितकाम्यया ॥ ६० ॥
ततो भगवता तस्य शिरः छिन्नमलंकृतं ।
चक्रायुधेन चक्रेण पिबतो ऽमृतमोजसा ॥ ६१ ॥
तच्छैलशृङ्गप्रतिमं दानवस्य शिरो महत् ।
चक्रछिन्नं खमुत्पत्य ननादातिभयंकरं ॥ ६२ ॥
तत्कबन्धं पपातास्य विस्फुरद्धरणीतले ।
सपर्वतवनद्वीपां दैत्यस्याकम्पयन्महीं ॥ ६३ ॥
ततो वैरविनिर्बन्धः कृतो राहुमुखेन वै ।
शाश्वतश्चन्द्रसूर्याभ्यां ग्रसत्यद्यापि चैव तौ ॥ ६४ ॥
विहाय भगवांश्चापि स्त्रीरूपमतुलं हरिः ।
नानाप्रहरणैर्भीमैर्दानवान्समकम्पयत् ॥ ६५ ॥
ततः संवृत्तः संग्रामः समीपे लवणाम्भसः ।
सुराणामसुराणां च सर्वघोरतरो महान् ॥ ६६ ॥

प्रासाश्च विपुलास्तीक्ष्णा न्यपतन्त सहस्रशः ।
तोमराश्च सुतीक्ष्णाग्राः शस्त्राणि विविधानि च ॥ ६७ ॥
ततो ऽसुराः चक्रभिन्ना वमन्तो रुधिरं बहु ।
असिशक्तिगदारुग्णा निपेतुर्धरणीतले ॥ ६८ ॥
छिन्नानि पट्टिशैश्चैव शिरांसि युधि दारुणैः ।
तप्तकाञ्चनचित्राणि निपेतुरनिशं तदा ॥ ६९ ॥
रुधिरेणानुलिप्ताङ्गा निहताश्च महासुराः ।
अद्रीणामिव कूटानि धातुरक्तानि शेरते ॥ ७० ॥
हाहाकारः समभवत्तत्र तत्र सहस्रशः ।
अन्योन्यं छिन्दतां शस्त्रैरादित्ये लोहितायति ॥ ७१ ॥
परिघैरायसैस्तीक्ष्णैः संनिकर्षे च मुष्टिभिः ।
निघ्नतां समरे ऽन्योन्यं शब्दो दिवमिवास्पृशत् ॥ ७२ ॥
छिन्धि भिन्धि प्रधाव त्वं पातयाभिसरेति च ।
व्यश्रूयन्त महाघोराः शब्दास्तत्र समन्ततः ॥ ७३ ॥
एवं सुतुमुले युद्धे वर्तमाने महाभये ।
नरनारायणौ देवौ समाजग्मतुराहवं ॥ ७४ ॥
तत्र दिव्यं धनुर्दृष्ट्वा नरस्य भगवानपि ।
चिन्तयामास तच्चक्रं विष्णुर्दानवसूदनं ॥ ७५ ॥
ततो ऽम्बराच्चिन्तितमात्रमागतं
महाप्रभं चक्रममित्रतापनं ।
विभावसोस्तुल्यमकुण्ठमण्डलं
सुदर्शनं संयति भीमदर्शनं ॥ ७६ ॥

तदागतं ज्वलितहुताशनप्रभं
भयंकरं करिकरबाहुरच्युतः ।
मुमोच वै प्रबलवदुग्रवेगवा-
न्महाप्रभं परनगरावदारणं ॥ ७७ ॥
तदन्तकज्वलनसमानवर्चसं
पुनः पुनर्न्यपतत वेगवत्तदा ।
विदारयद्दितिदनुजान्सहस्रशः
करेरितं पुरुषवरेण संयुगे ॥ ७८ ॥
दहत्क्वचिज्ज्वलन इवावलेलिहि-
त्प्रसह्य तानसुरगणान्यकृन्तत ।
प्रवेशितं वियति मुहुः क्षितौ तथा
पपौ रणे रुधिरमथो पिशाचवत् ॥ ७९ ॥
तथासुरा गिरिभिरदीनचेतसो
मुहुर्मुहुः सुरगणमर्दयंस्तदा ।
महाबला विगलितमेघवर्चसः
सहस्रशो गगनमभिप्रपद्य ह ॥ ८० ॥
अथाम्बराद्भयजननाः प्रपेदिरे
सपादपा बहुविधमेघरूपिणः ।
महाद्रयः परिगलिताग्रसानवः
परस्परं द्रुतमभिहत्य सस्वनाः ॥ ८१ ॥
ततो मही प्रविचलिता सकानना
महाद्रिपाताभिहता समन्ततः ।

परस्परं भृशमभिगर्जतां मुहू-
रणाजिरे भृशमभिसंप्रवर्तिते ॥ ८२ ॥
नरस्ततो वरकनकाग्रभूषणै-
र्महेषुभिर्गगनपथं समावृणोत् ।
विदारयन्गिरिशिखराणि पत्रिभि-
र्महाभये ऽसुरगणविग्रहे तदा ॥ ८३ ॥
ततो महीं लवणजलं च सागरं
महासुराः प्रविविशुरर्दिताः सुरैः ।
वियद्गतं ज्वलितहुताशनप्रभं
सुदर्शनं परिकुपितं निशम्य ते ॥ ८४ ॥
ततः सुरैर्विजयमवाप्य मन्दरः
स्वमेव देशं गमितः सुपूजितः ।
विनाद्य खं दिवमपि चैव सर्वश-
स्ततो गताः सलिलधरा यथागतं ॥ ८५ ॥
ततो ऽमृतं सुनिहितमेव चक्रिरे
सुराः परां मुदमभिगम्य पुष्कलां ।
ददौ च तं निधिममृतस्य रक्षितुं
किरीटिने बलभिदथामरैः सह ॥ ८६ ॥

इति श्रीमहाभारत आदिपर्वण्यमृतमन्थनं ॥

## अथ ऋतुसंहारे निदाघवर्णना ॥

प्रचण्डसूर्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसंचयः ।
दिनान्तरम्यो ऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये ॥ १ ॥
निशाः शशाङ्कक्षतनीलराजयः
क्वचिद्विचित्रं जलयन्त्रमन्दिरं ।
मणिप्रकाराः सरसं च चन्दनं
शुचौ प्रिये यान्ति जनस्य सेव्यतां ॥ २ ॥
सुवासितं हर्म्यतलं मनोरमं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रि गीतं मदनस्य दीपनं
शुचौ निशीथे ऽनुभवन्ति कामिनः ॥ ३ ॥
नितम्बविम्बैः सदुकूलमेखलैः
स्तनैः सहाराभरणैः सचन्दनैः ।
शिरोरुहैः स्नानकषायवासितैः
स्त्रियो निदाघं शमयन्ति कामिनां ॥ ४ ॥
नितान्तलाक्षारसरागलोहितै-
र्नितम्बिनीनां चरणैः सनूपुरैः ।
पदे पदे हंसरुतानुकारिभि-
र्जनस्य चित्तं क्रियते समन्मथं ॥ ५ ॥

पयोधराश्चन्दनपङ्कशीतला-
स्तुषारगौरार्पितहारशेखराः ।
नितम्बदेशाश्च सहेममेखलाः
प्रकुर्वते कस्य मनो न सोत्सुकं ॥ ६ ॥
समुद्गतस्वेदचिताङ्गसन्धयो
विमुच्य वासांसि गुरूणि सांप्रतं ।
स्तनेषु तन्वंशुकमुन्नतस्तना
निवेशयन्ते प्रमदाः सयौवनाः ॥ ७ ॥
सचन्दनाम्बुव्यजनोद्भवानिलैः
सहारयष्टिस्तनमण्डलार्पणैः ।
सवल्लकीकाकलिगीतनिस्वनैः
प्रबुध्यते सुप्त इवाद्य मन्मथः ॥ ८ ॥
सितेषु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य निर्यन्त्रणमुत्सुकश्चिरं
निशाक्षये याति ह्रियेव पाण्डुतां ॥ ९ ॥
असह्यवातोद्धतरेणुमण्डला
प्रचण्डसूर्यातपतापिता मही ।
न शक्यते द्रष्टुमपि प्रवासिभिः
प्रियावियोगानलदग्धमानसैः ॥ १० ॥
मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः ।

वनान्तरे तोयमिति प्रधाविता
निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ॥ ११ ॥
सविभ्रमैः सस्मितजिह्मवीक्षितै-
र्विलासवत्यो मनसि प्रसङ्गिनां ।
अनङ्गसंदीपनमाशु कुर्वते
यथा प्रदोषाः शशिचारुभूषणाः ॥ १२ ॥
रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांशुभिः ।
अवाक्फणो जिह्मगतिः श्वसन्मुहुः
फणी मयूरस्य तले निषीदति ॥ १३ ॥
तृषा महत्या हतविक्रमोद्यमः
श्वसन्मुहुर्दूरविदारिताननः ।
न हन्त्यदूरे ऽपि गजान्मृगाधिपो
विलोलजिह्वश्चलिताग्रकेशरः ॥ १४ ॥
विशुष्ककण्ठोद्गतशीकराम्भसो
गभस्तिभिर्भानुमतो ऽभितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो
न दन्तिनः केशरिणो ऽपि बिभ्यति ॥ १५ ॥
हुताग्निकल्पैः सवितुर्मरीचिभिः
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्तिनं
कलापचक्रेषु निवेशिताननं ॥ १६ ॥

सभद्रमुस्तं परिपाण्डुकर्दमं
सरः खनन्नायतपोत्रमण्डलैः ।
प्रदीप्तभासा रविणाभितापितो
वराहयूथो विशतीव भूतलं ॥ १७ ॥
विवस्वता तीक्ष्णतरांशुमालिना
सपङ्कतोयात्सरसो ऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः
फणातपत्रस्य तले निषीदति ॥ १८ ॥
समुद्धृताशेषमृणालजालकं
विपन्नमीनं द्रुतभीतसारसं ।
परस्परोत्पीडनसंहतैर्गजैः
कृतं सरः सान्द्रविमर्दकर्दमं ॥ १९ ॥
रविप्रभोद्भिन्नशिरोमणिप्रभो
विलोलजिह्वाद्वयपीतमारुतः ।
विषाग्निसूर्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषाकुलः ॥ २० ॥
सफेनलालावृतरक्तसंपुटं
विनिर्गतालोहितजिह्वमुन्मुखं ।
तृषाकुलं निःसृतमद्रिगह्वरा-
दवेक्षमाणं महिषीकुलं जलं ॥ २१ ॥
पटुतरवनदाहोत्प्लुष्टशस्पप्ररोहाः
परुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः ।

दिनकरपरितापात्क्षीणतोयाः समन्ता-
द्विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥ २२ ॥
श्वसिति विहगवृन्दः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जं ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छ-
न्शरभकुलमजिह्मं प्रोद्धरेदम्बु कूपात् ॥ २३ ॥
विकचनवकुसुम्भस्वच्छसिन्दूरभासा
प्रबलपवनवेगोद्भूतवेगेन तूर्णं ।
तरुविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥ २४ ॥
ध्वनति पवनविद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
क्षपयति मृगयूथं प्रान्तलग्नो दवाग्निः ॥ २५ ॥
बहुतर इव जातः शाल्मलीनां वनेषु
स्फुरति कनकगौरः कोटरेषु द्रुमाणां ।
परिणतदलशाखादुत्पतत्याशु वृक्षा-
द्भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥ २६ ॥
गजगवयमृगेन्द्रा वह्निसंतप्तदेहाः
सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदादाशु निर्गत्य कक्षा-
द्विपुलपुलिनदेशां निम्नगामाश्रयन्ते ॥ २७ ॥

कमलवनचिताम्बुः पाटलामोदरम्यः
सुखसलिलनिषेकः सेव्यचन्द्रांशुजालः ।
व्रजतु तव निदाघः कामिनीभिः समेतं
निशि सुललितगीतैर्हर्म्यपृष्ठे सुखेन ॥ २८ ॥

इति श्रीकालिदासकृतावृतुसंहारे निदाघवर्णना समाप्ता ॥

## अथ संक्षेपशङ्करजये बौद्धानां बाधः ॥

एकदा देवता रूप्याचलस्थमुपतस्थिरे ।
देवदेवं तुषारांशुमिव पूर्वाचलस्थितं ॥ १ ॥
प्रसादानुमितस्वार्थसिद्धयः प्रणिपत्य तं ।
मुकुलीकृतहस्ताब्जा विनयेन व्यजिज्ञपन् ॥ २ ॥
विज्ञातमेव भगवन्विद्यते यद्धिताय नः ।
वञ्चयन्सुगतान्बुद्धवपुर्धारी जनार्दनः ॥ ३ ॥
तत्प्रणीतागमालम्बैर्बौद्धैर्दर्शनदूषकैः ।
व्याप्तेदानीं प्रभो धात्री रात्रिः संतमसैरिव ॥ ४ ॥
वर्णाश्रमसमाचारान्द्विषन्ति ब्रह्मविद्विषः ।
ब्रुवन्त्याम्नायवचसां जीविकामात्रतां प्रभो ॥ ५ ॥
न संध्यादीनि कर्माणि न्यासं वा न कदाचन ।
करोति मनुजः कश्चित्सर्वे पाषण्डतां गताः ॥ ६ ॥

श्रुते पिदधति श्रोत्रे क्रतुरित्यक्षरद्वये ।
क्रियाः कथं प्रवर्तेरन्कथं क्रतुभुजो वयं ॥ ७ ॥
शिवविष्ण्वागमपरैर्लिङ्गचक्रादिचिह्नितैः ।
पाषण्डैः कर्म संन्यस्तं कारुण्यमिव दुर्जनैः ॥ ८ ॥
अनन्येनैव भावेन गच्छन्त्युत्तमपूरुषं ।
श्रुतिः साध्वी मदक्षीवैः का वा शाक्तैर्न दूषिता ॥ ९ ॥
सद्यःकृत्तद्विजशिरःपङ्कजार्चितभैरवैः ।
न ध्वस्ता लोकमर्यादा का वा कापालिकाधमैः ॥ १० ॥
अन्ये ऽपि बहवो मार्गाः सन्ति भूमौ ससंकटाः ।
जनैर्येषु पदं दत्त्वा दुरन्तं दुःखमाप्यते ॥ ११ ॥
तद्भवाँल्लोकरक्षार्थमुत्साद्य निखिलान्खलान् ।
वर्त्म स्थापयतु श्रौतं जगद्येन सुखं व्रजेत् ॥ १२ ॥
इत्युक्तोपरतान्देवानुवाच गिरिजाप्रियः ।
मनोरथं पूरयिष्ये मानुष्यमवलम्ब्य वः ॥ १३ ॥
दुष्टाचारविनाशाय धर्मसंस्थापनाय च ।
भाष्यं कुर्वन्ब्रह्मसूत्रतात्पर्यार्थविनिर्णयं ॥ १४ ॥
मोहनप्रकृतिच्छिन्नध्वान्तमध्याह्नभानुभिः ।
चतुर्भिः सहितः शिष्यैश्चतुरैर्हरिवद्भुजैः ॥ १५ ॥
यतीन्द्रः शङ्करो नाम्ना भविष्यामि महीतले ।
मद्वत्तया भवन्तो ऽपि मानुषीं तनुमाश्रिताः ॥ १६ ॥
तं मामनुसरिष्यन्ति सर्वे त्रिदिववासिनः ।
तदा मनोरथः पूर्णो भवतां स्यान्न संशयः ॥ १७ ॥

ब्रुवन्नेवं दिविषदः कटाक्षानन्यदुर्लभान् ।
कुमारे निदधे भानुः किरणानिव पङ्कजे ॥ १८ ॥
क्षीरनीरनिधेर्वीचिसचिवान्प्राप्य तान्गुहः ।
कटाक्षान्मुमुदे रश्मीन्कुमुद्वानैन्दवानिव ॥ १९ ॥
अवदन्नन्दनं स्कन्दममन्दं चन्द्रशेखरः ।
दत्तचन्द्रातपानन्दिवृन्दारकचकोरकः ॥ २० ॥
शृणु सौम्य वचः श्रेयो जगदुद्धारगोचरं ।
काण्डत्रयात्मके वेदे प्रोद्धृते स्याद्द्विजोद्धृतिः ॥ २१ ॥
तद्रक्षणे रक्षितं स्यात्सकलं जगतीतलं ।
तदधीनत्वतो वर्णाश्रमधर्मततेस्ततः ॥ २२ ॥
इदानीमिदमुद्धार्यमिति वृत्तिमतः पुरा ।
मम गूढाशयविदौ विष्णुशेषौ समीपगौ ॥ २३ ॥
मध्यमं काण्डमुद्धर्तुमनुज्ञातौ मयैव तौ ।
अवतीर्यांशतो भूमौ संकर्षणपतञ्जली ॥ २४ ॥
मुनी भूत्वा तदोपास्तियोगकाण्डकृतौ स्थितौ ।
अग्रिमं ज्ञानकाण्डं तूद्धरिष्यामीति देवताः ॥ २५ ॥
संप्रति परिज्ञाने स्म ज्ञानात्येव भवानपि ।
जैमिनीयन्यायवार्धेः शरत्पर्वशशी भव ॥ २६ ॥
विशिष्टं कर्मकाण्डं त्वमुद्धर ब्रह्मणः कृते ।
सुब्रह्मण्य इति ख्यातिं गमिष्यसि ततोऽधुना ॥ २७ ॥
नैगमीं कुरु मर्यादामवतीर्य महीतले ।
निर्जित्य सौगतान्सर्वानाम्नायार्थविरोधिनः ॥ २८ ॥

ब्रह्मापि ते सहायार्थं मण्डनो नाम भूसुरः ।
भविष्यति महेन्द्रो ऽपि सुधन्वा नाम भूमिपः ॥ २९ ॥
तथेति प्रतिजग्राह विधेरपि विधायिनीं ।
बुधानीकपतिर्वाणीं सुधाधारामिव प्रभोः ॥ ३० ॥
अथेन्द्रो नृपतिर्भूत्वा प्रजा धर्मेण पालयन् ।
दिवं चकार पृथिवीं स्वपुरीममरावतीं ॥ ३१ ॥
सर्वज्ञो ऽप्यसतां शास्त्रे कृत्रिमश्रद्धयान्वितः ।
प्रतीक्षमाणः क्रौञ्चारिं मेलयामास सौगतान् ॥ ३२ ॥
ततः स तारकारातिरजनिष्ट महीतले ।
भट्टपादाभिधा यस्य भूषा दिक्सुदृशामभूत् ॥ ३३ ॥
स्फुटयन्वेदतात्पर्यमभाड्जैमिनिसूत्रितं ।
सहस्रांशुरिवानूरुव्यञ्जितं भासयञ्जगत् ॥ ३४ ॥
राज्ञः सुधन्वनः प्राप नगरीं स जयन्दिशः ।
प्रत्युद्गम्य क्षितीन्द्रो ऽपि विधिवत्तमपूजयत् ॥ ३५ ॥
सो ऽभिनन्द्याशिषा भूपमासीनः काञ्चनासने ।
तां सभां शोभयामास सुरभिर्भुवनीमिव ॥ ३६ ॥
सभासमीपविटपिश्रितकोकिलकूजितं ।
श्रुत्वा जगाद तद्व्याजाद्राजानं पण्डिताग्रणीः ॥ ३७ ॥
मलिनैश्चेन्न सङ्गस्ते नीचैः काककुलैः पिक ।
श्रुतिदूषकनिर्ह्रादैः श्लाघनीयस्तदा भवेः ॥ ३८ ॥
षडभिज्ञा निशम्येमां वाचं तात्पर्यगर्भितां ।
नितरां चरणस्पृष्टा भुजंगा इव चक्रुधुः ॥ ३९ ॥

छित्वा युक्तिकुठारेण बुद्धसिद्धान्तशाखिनं ।
स तद्ग्रन्थेन्धनैश्चीर्णैः क्रोधज्वालामवर्धयत् ॥ ४० ॥
सा सभा वदनैस्तेषां रोषपाटलकान्तिभिः ।
बभौ बालातपाताम्रैः सरसीव सरोरुहैः ॥ ४१ ॥
उपन्यस्यत्सु साक्षेपं खण्डयत्सु परस्परं ।
तेषूदतिष्ठन्निर्घोषो भिन्दन्निव रसातलं ॥ ४२ ॥
अधः पेतुर्बुधेन्द्रेण क्षताः पक्षेषु तत्क्षणं ।
व्यूढकर्कशतर्केण तथागतधराधराः ॥ ४३ ॥
स सर्वज्ञपदं विज्ञो ऽसहमान इव द्विषां ।
चकार चित्रविन्यस्तानेतान्मौनविभूषितान् ॥ ४४ ॥
ततः प्रक्षीणदर्पेषु बौद्धेषु वसुधाधिपं ।
बोधयन्बहुधा वेदवचांसि प्रशशंस सः ॥ ४५ ॥
बभाषे ऽथ धराधीशो विद्यायत्तौ जयाजयौ ।
यः पतित्वा गिरेः शृङ्गादव्ययस्तन्मतं ध्रुवं ॥ ४६ ॥
तदाकर्ण्य मुखान्यन्ये परस्परमलोकयन् ।
द्विजाग्र्यस्तु स्मरन्वेदानारुरोह गिरेः शिरः ॥ ४७ ॥
यदि वेदाः प्रमाणं स्युर्भूयात्काचिन्न मे क्षतिः ।
इति घोषयता तस्मान्न्यपाति सुमहात्मना ॥ ४८ ॥
किमु दौहित्रदत्ते ऽपि पुण्ये विलयमास्थिते ।
ययातिश्च्यवते स्वर्गात्पुनरित्यूचिरे जनाः ॥ ४९ ॥
अपिः लोकगुरु शैलात्तूलपिण्ड इवापतत् ।
श्रुतिरात्मशरण्यानां व्यसनं नो छिनत्ति किं ॥ ५० ॥

श्रुत्वा तदद्भुतं कर्म द्विजा दिग्भ्यः समाययुः ।
घनघोषमिवाकर्ण्य निकुञ्जेभ्यः शिखावलाः ॥ ५१ ॥
दृष्ट्वा तमद्भुतं राजा श्रद्धां श्रुतिषु संदधे ।
निनिन्द बहुधात्मानं खलसंसर्गदूषितं ॥ ५२ ॥
सौगतास्त्वब्रुवन्नेदं प्रमाणं मतनिर्णये ।
मणिमन्त्रौषधैरेवं देहरक्षा भवेदिति ॥ ५३ ॥
दुर्विधैरन्यथानीते प्रत्यक्षे ऽर्थे ऽपि पार्थिवः ।
भ्रुकुटीभीकरमुखः संधामुग्रतरां व्यधात् ॥ ५४ ॥
पृच्छामि भवतः किंचिद्वक्तुं न प्रभवन्ति ये ।
यन्त्रोपलेषु सर्वांस्तान्घातयिष्याम्यसंशयं ॥ ५५ ॥
इति संश्रुत्य गोत्रेशो घटमाशीविषान्वितं ।
आनाय्यात्र किमस्तीति पप्रच्छ द्विजसौगतान् ॥ ५६ ॥
वक्ष्यामहे वयं भूयः श्वः प्रभाते ऽस्य निर्णयं ।
इति प्रसाद्य राजानं जग्मुर्भूसुरसौगताः ॥ ५७ ॥
पद्मा इव तपः तेपुः कण्ठद्वयसपाथसि ।
द्युमणिं प्रति भूदेवाः सो ऽपि प्रादुरभूत्ततः ॥ ५८ ॥
संदिश्य वचनीयांशमादित्ये ऽन्तर्हिते द्विजाः ।
आजग्मुरपि निश्चित्य सौगताः कलशस्थितं ॥ ५९ ॥
ततस्ते सौगताः सर्वे भुजगो ऽस्तीत्यवादिषुः ।
भोगीशभोगशयनो भगवानिति भूसुराः ॥ ६० ॥
श्रुतभूसुरवाक्यस्य वदनं पृथिवीपतेः ।
कासारशोषणाम्लानसारसश्रियमाददे ॥ ६१ ॥

अथ प्रोवाच दिव्या वाक्सम्राजमशरीरिणी ।
नुदन्ती संशयं तस्य सर्वेषामपि शृण्वतां ॥ ६२ ॥
सत्यमेव महाराज ब्राह्मणा यद्बभाषिरे ।
मा कृथाः संशयं तत्र भव सत्यप्रतिश्रवः ॥ ६३ ॥
श्रुत्वाशरीरिणीं वाणीं ददर्श वसुधाधिपः ।
मूर्तिं मधुद्विषः कुम्भे सुधामिव सुराधिपः ॥ ६४ ॥
निरस्ताखिलसंदेहो विन्यस्तेतरदर्शनात् ।
व्यधादाज्ञां ततो राजा वधाय श्रुतिविद्विषां ॥ ६५ ॥
आ सेतोरा तुषाराद्रेर्बौद्धानावृद्धबालकं ।
न हन्ति यः स हन्तव्यो भृत्यानित्यन्वशान्नृपः ॥ ६६ ॥
इष्टो ऽपि दुष्टदोषश्चेद्वध्य एव महात्मनां ।
जननीमपि किं साक्षान्नावधीद्भृगुनन्दनः ॥ ६७ ॥
स्कन्दानुसारिराजेन जैना धर्मद्विषो हताः ।
योगीन्द्रेणैव योगघ्ना विघ्नास्तत्त्वावलम्बिना ॥ ६८ ॥
हतेषु तेषु दुष्टेषु पप्रितस्तार कोविदः ।
श्रौतवर्त्म तमिस्रेषु नष्टेष्विव रविर्महः ॥ ६९ ॥
कुमारिलमृगेन्द्रेण हतेषु जिनहस्तिषु ।
निष्प्रत्यूहमवर्धन्त श्रुतिशाखाः समन्ततः ॥ ७० ॥
प्रागित्थं ज्वलनभुवा प्रवर्तितेऽस्मि-
न्कर्माध्वन्यखिलविदा कुमारिलेन ।
उद्धर्तुं भुवनमिदं भवाब्धिमग्नं ।
कारुण्याम्बुनिधिरियेष चन्द्रचूडः ॥ ७१ ॥

इति श्रीमाधवीये तदुपोद्घातकथापरः।
संक्षेपशङ्करजये सर्गो ऽयं प्रथमो ऽभवत् ॥

---

## ॥ अथ नैषधीये दमयन्तीं प्रति नलस्य चन्द्रोदयवर्णनं ॥

पश्यावृतो ऽप्येष निमेषमद्रेरधित्यकाभूमितिरस्करिण्या।
प्रवर्षति प्रेयसि चन्द्रिकाभिश्चकोरचञ्चूचुलुकान्प्रतीन्दुः ॥

पश्येति। हे प्रेयसि प्राणप्रिये एष इन्दुश्चन्द्रिकाभिश्चकोराणां चन्द्रिकास्वदमृतपायिनां पक्षिणां चञ्चू एव चुलुकास्तान्प्रति पूरयित्वा प्रकर्षेण वर्षति सुधामित्यर्थात्। यावता चकोरचञ्चूपूरणं भवति तावत्प्रमाणं वर्षतीत्यर्थः। त्वं पश्य। किंभूतः। अद्रेरुदयाचलस्याधित्यकाभूम्योर्ध्वशिखरेणैव तिरस्करिण्या जवनिकया निमेषलक्षणमत्यल्पकालमावृतो ऽपि सन्संपूर्णानुदितो ऽपि प्रथमचन्द्रिकाभिरेव चकोराणामानन्दं करोति किं पुनरुदितः सन्निति भावः। अन्यो ऽप्युपकारी दूरस्थो ऽप्युदयोन्मुखो ऽन्येषामुपकरोति ॥ ४१ ॥

ध्वान्ते द्रुमान्तानभिसारिकास्त्वं
शङ्कस्व संकेतनिकेतमाप्ताः।
छायाछलादुज्झितनीलचेला
ज्योत्स्नानुकूलैश्चलिता दुकूलैः ॥ ४२ ॥

ध्वान्त इति। हे प्रिये त्वं चन्द्रोदयात्पूर्वं ध्वान्ते सति द्रुमान्तांस्तरुनिकटदेशानेव वृक्षाधोभागानेव संभोगार्थं कामुकदत्तसंकेतनिकेतं प्राप्तास्ता अभिसारिकाः स्वैरिणीः शङ्कस्व संभावय। तथेदानीं चन्द्रोदये सति वृक्षाधोभागवर्तिछायाछलादुज्झितं पूर्वधृतं तमोऽनुकूलं चेलं वस्त्रं याभिस्तादृशीः सतीः सवर्णत्वाज्ज्योत्स्नानुकूलैश्चन्द्रिकानुगुणैर्धवलतरैर्दुकूलैरुपलक्षिताः सतीश्चलिताः संभोगं कृत्वा स्वगृहं प्रति पुनः परावृत्तास्त्वं संभावय। तमसि सत्येव केनापि न ज्ञातव्यमिति बुद्ध्या नीलं वस्त्रं

परिधाय संकेतस्थानमागताश्चन्द्रोदये पुनर्नीलवस्त्रपरिधाने पूर्ववद्रीत्या तत्रत्रैव विहाय श्वेतं दुकूलं सवर्णत्वात्परिधाय केनापि न ज्ञाताः। नीलचोला इति पाठे चोलः कूर्पासः ॥ ४२ ॥

त्वदास्यलक्ष्मीमुकुरं चकोरैः स्वकौमुदीमादयमानमिन्दुं।
दृशा निशेन्दीवरचारुभासा पिबोरु रम्भातरुपीवरोरु ॥

त्वदिति। हे रम्भातरुपीवरोरु रम्भातरुवदतिपीवरावूरू यस्यास्तत्संबुद्धिस्त्वं निशायामिन्दीवरं नीलोत्पलं तद्वच्चारुभा यस्यास्तया दृशा ऊरु सादरमिन्दुं पिब विलोकय। किंभूतं। तवास्यलक्ष्म्याः मुखशोभाया अवलोकनार्थं मुकुरं दर्पणमिव। तथा चकोरैः प्रयोज्यैः स्वकौमुदीमादयमानं निजकौमुदीं चकोरान्पाययमानं। उदिते चन्द्रे चकोराः सानन्दा जाता नीलोत्पलानि च विकसितानीति भावः। एतेनेन्दोः परोपकारित्वं सूचितं। विकसितेन्दीवरतुल्यया दृशा पिबेत्यनेन चन्द्रोदये हीन्दीवरं विकसति त्वं चैवंभूतया दृशा यदा चन्द्रमवलोकयिष्यसि तदा जनस्त्वद्दृशं चन्द्रावलोकनविकसितमिन्दीवरमेवैतदिति ज्ञास्यतीति सूचितं। दिवासंकोचादसादृश्यमितीन्दीवरस्य विकसितत्वद्योतनार्थं निशापदं ॥ ४३ ॥

असंशयं सागरभागुदस्थात्पृथ्वीधरादेव मथः पुरायं।
अमुष्य यस्मादधुनापि सिन्धौ स्थितस्य शैलादुदयं प्रतीमः ॥

असंशयमिति। पुरा पूर्वं सागरभाक्समुद्रगर्भस्थोऽयं चन्द्रो मथो दण्डभूतात्पृथ्वीधरात्पर्वतान्मन्दराद्रेरेव हेतोरुदस्थादुत्पन्न इत्यसंशयं निश्चितं पुराणादौ यदेवं श्रूयते तत्सत्यमित्यर्थः। पुरोदस्थात्प्रथमसंभवावसरे तस्मादेव समुत्थित इति वा। तत्र हेतुमाह। यस्माद्धेतोरधुनापि संभवान्तरावसरेऽपि सिन्धौ स्थितस्य सागरगर्भस्थस्याप्यमुष्य चन्द्रस्य शैलादुदयाचलादेवोदयमुत्पत्तिं प्रतीमो जानीमः। प्रत्यहं सागरस्थस्याप्यस्याचलोत्पत्तिशीलत्वरूपलिङ्गदर्शनात्समुद्रमथने प्रथमसंभवावसरेऽप्ययमचलादेवोत्पन्न इति निश्चिनुम इत्यर्थः। उदयाचलशिखरं चन्द्रोऽतिक्रामतीति भावः ॥ ४४ ॥

निजानुजेनातिथितामुपेतः प्राचीपतेर्वाहनवारणेन।
सिन्दूरसान्द्रे किमकारि मूर्ध्नि तेनारुणश्रीरयमुज्जिहीते ॥

निजानुजेनैकस्मात्सिन्धोरुत्पन्नतयास्माच्चन्द्रात्पश्चाज्जातेन कनीयसा भ्रात्रा प्राचीपतेरिन्द्रस्य वाहनवारणेन प्राच्यां स्थितेनैरावतेनातिथितामुपेतः प्राप्तः प्राच्यामुदितत्वात्तत्सविधं प्राप्तः सन्नयं चन्द्रोऽग्रजत्वात्सिन्दूरेण सान्द्रे मूर्ध्नि अकारि कृतः किं। गौरवान्नमस्कारपूर्वं शिरस्यारोपितः किमित्यर्थः। तेन सान्द्रसिन्दूरशिरःस्थापनेन हेतुना

लग्नसिन्दूरवशादयमरुणाश्लोरारक्तशोभ उज्जिहीत उदयते। उज्जिहीते किमिति वा। उदयंश्चन्द्रः सिन्दूररक्तो दृश्यत इत्यर्थः ॥ ४५ ॥

यत्प्रीतिमद्भिर्वदनैः स्वसाम्यादचुम्बि नाकाधिपनायिकानां।
ततस्तदीयाधरयावयोगादुदेति विम्बारुणविम्ब एषः ॥

यदिति। वृत्तत्वादिगुणयोगेन स्वसाम्यात्प्रीतिमद्भिर्नाकाधिपस्येन्द्रस्य नायिकानां वदनैर्यस्मात्स्वसविधमागत एष चन्द्रोऽचुम्बि तस्माद्धेतोस्तस्माच्चुम्बनाद्वा तदीयानां देवेन्द्रनायिकानामधरेषु न्यस्तो यावोऽलक्तकस्तस्य योगात्संबन्धाद्धेतोर्विम्बवत्पक्वविम्बीफलवद्रुणं विम्बं मण्डलं यस्य तादृश उदेति। अन्योऽपि समानः स्वसविधमागतः सन्सख्या प्रीत्या चुम्ब्यते। मुखैरिति बहुवचनेन तत्र प्रदेशे युगपदेव चुम्बनाद्बहुलयावकयोगात्सकलस्यापि चन्द्रविम्बस्य रक्तत्वं युक्तमिति सूचितं ॥ ४६ ॥

विलोमिताङ्कोत्किरणाद्दुरूहदृगादिना दृश्यविलोचनादि।
विधिर्विधत्ते विधुना वधूनां किमाननं काञ्चनसञ्चकेन ॥

विलोमितेति। विधिर्विधुना चन्द्रेणैव काञ्चनस्य सञ्चकेन विम्बकेन कृत्वा वधूनामतिरमणीयमाननं विधत्ते किं। किंभूतेन। विलोमितः पराङ्मुखः कृतः स्वप्रभया जितोऽङ्कः कलङ्को येनैतादृशादुत्कृष्टादतितेजस्विनः किरणाद्धेतोर्दुरूहो दुस्तर्क्यो दृगादिर्नेत्राद्यवयवो यस्य। अथ च विपरीतीकृतानामङ्कानां नेत्रादिनिर्माणार्थं निम्नोन्नतांशचिह्नस्थानानामुत्किरणं संघट्टनं तस्माद्धेतोः साक्षादलक्ष्यनेत्रकर्णनासिकाद्यवयवेन। आननं च साक्षाद्दृश्या विलोचनादयो नासाकर्णाद्यवयवा यस्य तादृशं। तस्मिन्ब्रह्मा स्त्रीमुखं चन्द्ररूपेण महाराष्ट्रभाषया ठसा इत्याख्येन स्वर्णस्य सञ्चकेन निर्ममे। सञ्चके हि निष्पाद्यस्य वस्तुनो निम्नोन्नतभागा विपरीता एवोत्कीर्यन्ते तत्र च नेत्राद्यवयवा दुर्ज्ञेया भवन्ति भवन्निर्मितमुखादौ च दृश्या भवन्ति तस्मादेवं तर्क्य इत्यर्थः। उदितमात्रश्चन्द्रोऽल्पतमसुवर्णसञ्चकवद्रक्तो दृश्यत इति भावः। उत्तमं सुवर्णं रक्तं भवति। आननमिति जात्यैकवचनं ॥ ४७ ॥

अनेन वेधा विपरीतरूपविनिर्मिताङ्कोत्किरणाङ्ककेन।
त्वदाननं दृश्यदृगाद्यलक्ष्यदृगादिनैवाकृत सञ्चकेन ॥ ४८ ॥

अनेनेति। वेधा विपरीतरूपं यथा तथा विनिर्मितमुक्तविधमङ्कोत्किरणं यत्र तादृशमङ्कं यस्य तेन तथालक्ष्यदृगादिनानेन चन्द्रेणैव सञ्चकेन दृश्यं सुन्दरमथ च प्रत्यक्षदर्शनयोग्यं दृगादि यस्य तादृशं त्वदाननमकृत त्वदाननमेव कृतं न त्वन्याननमिति वा अयमेवात्र लोके विशेषः। अयं श्लोकः क्षेपकः ॥ ४८ ॥

अस्याः सुराधीशदिशः पुरासीद्यदम्बरं पीतमिदं रजन्या।
चन्द्रांशुचूर्णव्यतिचुम्बितेन तेनाधुना नूनमलोहितायि ॥

अस्या इति। हे भैमि अस्याः सुराधीशस्येन्द्रस्य दिशः यदम्बरं गगनं वस्त्रं च पुरा चन्द्रोदयात्पूर्वं रजन्या रात्र्या हरिद्रया च पीतं तमोव्याप्तत्वाद्दृश्यं पीतवर्णं वासीत्तेन गगनेन वस्त्रेण वाधुना चन्द्रोदये चन्द्रांशूनां चूर्णाः श्लक्ष्णसूक्ष्मतेजोलेशैः कर्तृभिर्व्यतिचुम्बितेनातितरां स्पृष्टेन सता चन्द्रांशुवच्छुभ्रतरेण चूर्णेन ताम्बूलसाधनचूर्णद्रव्येण स्पृष्टेन सता (वा) नूनमलोहितायारक्तीकृतं। यत्तमसा पूर्वं नीलमभूत्तदेवेदानीमुदयच्चन्द्रलोहितकरसंस्पर्शाद्रक्तं जातमित्यर्थः। हरिद्रया पीतवर्णं वस्त्रं चूर्णेन युक्तं सद्रक्तं भवति। देवेन्द्रस्त्रियाश्च वस्त्राणि नानावर्णयुक्तानि। चन्द्रांशव एव चूर्णमिति वा ॥ ५१ ॥

आदत्त दीप्रं मणिमम्बरस्य दत्वा यदस्मै खलु सायधूर्तः।
रज्यत्तुषारद्युतिकूटहेम तत्पाण्डु जातं रजतं क्षणेन ॥

आदत्तेति। हे भैमि सायंकालरूपो धूर्तो यद्रज्यनुदयकाले रक्तीभवंस्तुषारद्युतिश्चन्द्र एव लेपवशाद्रज्यत्कूटहेम कृत्रिमं सुवर्णमस्मै गगनाय मूल्यरूपेण दत्त्वा दीप्रं प्रकाशमानमम्बरस्य मणिं सूर्यमादत्त जग्राह तदलीकं हेम क्षणमात्रेण पाण्डु शुभ्रं रजतं खलु रूप्यमिव जातं। धूर्तो हि रूप्यं लेपादिभिरुपलिप्तं सुवर्णीकृत्य ददाति वस्त्वान्तरस्यमपि प्रसरद्दीप्तिकं रत्नं च गृह्णाति। उदयानन्तरमतिक्रान्तकियत्कालत्वाद्रक्तिमानं परित्यज्य चन्द्रो रूप्यवदुज्ज्वलो जात इति भावः ॥ ५२ ॥

बालेन नक्तंसमयेन मुक्तं रौप्यं लसड्डिम्बमिवेन्दुबिम्बं।
भ्रमिक्रमादुज्झितपट्टसूत्रनेत्रावृतिं मुञ्चति शोणिमानं ॥

बालेनेति। हे प्रिये रौप्यं राजतं रजतमयं लसद्दिलसमानं डिम्बं बालक्रीडासाधनं भ्रमरकमिवेन्दुबिम्बं कर्तृ भ्रमिक्रमाद्भ्रमणपरिपाट्याय चोर्द्धदेशगमनक्रमणेनोज्झिता त्यक्ता या पट्टसूत्रस्य नेत्रं दोरकं तत्कृतावृतिर्वेष्टनं तद्रूपमय च पट्टसूत्रजालिकावच्चन्द्रावरणं येन तं शोणिमानं रक्तिमानं मुञ्चति। किंभूतमुभयं। नक्तसमयरूपेण बालेनाय च बालेन प्रदोषरूपेण रात्रिसमयेन मुक्तं भ्रमणार्थं करात्कृतमोचनमय चोर्द्धोर्ध्वं जनितोदयं। शिशुक्रीडासाधनं हि भ्रमरकं काष्ठमयं भवति। ईश्वराणां च डिम्बं समृद्ध्यतिशयाद्राजतं पट्टसूत्रवलितदोरकस्रंसनात्तत्संबन्धजातं रक्तिमानं मुञ्चति। तथेदं चन्द्रबिम्बमित्यर्थः। इदानीं चन्द्रो धवलो जात इति भावः। नेत्रावृतेरिति पाठे भ्रमिक्रमाडेतोरुज्झिता पट्टसूत्रनेत्रावृत्तिर्यत्र तादृशाद्भ्रमिक्रमाडेतोरिति वा। डिम्बं लडिम्बमिति

वा गौडदेशभाषायां भ्रमरकस्य संज्ञा। महाराष्ट्रभाषायां कान्यकुब्जभाषायां च भ्रमरा इति संज्ञा। नेत्रं मन्थगुणे वस्त्र इत्यभिधानान्नेत्रशब्दो यद्यपि मन्थनवेष्टनगुणे मुख्यस्तथाप्यत्र गुणमात्रपर इति ज्ञेयं ॥ ५३ ॥

तारात्तरैर्यामसिते कठिन्या
निशालिखद्व्योम्नि तमःप्रशस्तिं।
विलुप्य तामल्पयतो ऽरुणो ऽपि
जातः करे पाण्डुरिमा हिमांशोः ॥ ५४ ॥

तारेति। निशासिते श्यामे व्योम्नि गगन एव कज्जलादिलिप्तश्यामलपट्टिकायां कठिन्याः शुभ्रधातुविशेषस्य संधिभिस्ताराक्षरैः शुभ्रैरक्षरैरिव नक्षत्ररूपैरक्षरैः कृत्वा यां तमःप्रशस्तिं तमोवर्णनश्लोकादिलिपिमलिखत्ताराक्षरैरुपलक्षितां तमःप्रशस्तिं रात्रिः कठिन्यालिखदिति वा तां लिपिं विलुप्य प्रोञ्छ्याल्पयतः परिमितताराक्षरं कुर्वतो हिमांशोररुणो ऽपि करे किरणे ऽथ च पाणौ पाण्डुरिमा जातः। प्ररूढकिरणे हि चन्द्रे नक्षत्राणामल्पतां भवतीति खटिकालिखिताक्षराणि मार्जयतश्चारक्तो ऽपि करः खटिकासङ्गाद्धवलो भवतीति। तमसि नक्षत्राणि बहून्युज्ज्वलतराणि च दृष्टानि चन्द्रे तूदिते ऽल्पानि निःप्रभाणि च जातानि चन्द्रश्च धवलो जात इति भावः ॥ ५४ ॥

सितो यदात्रैष तदान्यदेशे चकास्ति रज्यच्छविरुज्जिहानः।
तदित्थमेतस्य निधेः कलानां को वेद वा रागविरागतत्त्वं॥

सित इति। एष चन्द्रो यदा यस्मिन्काले ऽत्र देशे सितो धवलश्चकास्ति तदा तस्मिन्नेव काले ऽन्यदेशे रज्यच्छवी रक्तकान्तिरुज्जिहान उद्यन्शोभते। एवमत्रोदयन्रक्तो ऽन्यत्र च श्वेत इत्यपि सामर्थ्याल्लभ्यमेतद्वदेशस्थं प्रतीदानीं सितो दृश्यते द्वीपान्तरस्थं प्रति तूदयन्निदानीमेव दृश्यते यस्मात्तस्मात्कलानां निधेः पूर्णस्य चन्द्रस्य रागविरागयोर्लोहितत्वालोहितत्वयोस्तत्त्वं याथात्म्यमित्थममुनोक्तप्रकारेण को वा वेद अपि तु को ऽपि निश्चेतुं न शक्नोतीत्यर्थः। उदयास्तमययोरतात्त्विकत्वाद्व्यवहितस्य यत्र यदा प्रथमदर्शनं तदा तत्रोदय इति दूरस्थस्य रक्तत्वप्रत्ययः क्रमसामीप्यात्तु धावल्यप्रत्यय इति तत्त्वं। अन्यस्यापि चतुःषष्टिकलाभिज्ञानुरागाननुरागयोर्याथात्म्यं कुत्रानुरक्तः कुत्र वा नेति को ऽपि न जानाति ॥ ५५ ॥

काश्मीरजैरश्मिभिरौपसंध्यैर्मृष्टं धृतध्वान्तकुरङ्गनाभि।
चन्द्रांशुना चन्दनचारुणाङ्गं क्रमात्समालम्भि दिगङ्गनाभिः

काश्मीरजैरिति। दिग्भिरेवाङ्गनाभिः संध्यायाः समीपमुपसंध्यं तत्र जातैररुणैररश्मिभिरेव काश्मीरजैः कुङ्कुमैः कृत्वा मृष्टं पूर्वं कृतोद्वर्तनं ततः संध्यायामपगतायां धृता ध्वान्तरूपा मृगनाभिः कस्तूरी येन तादृशमङ्गं क्रमात्कस्तूरीलेपनानन्तरं चन्द्रांशुनैव चन्दनेषु मध्ये चारुणोत्तमेन चन्दनेन कृत्वा समालम्भ्यलेपि। अन्या अप्यङ्गनाः कुङ्कुमादिक्रमेणाङ्गमनुलिम्पन्ति चन्दनधवलैश्चन्द्रकरैः सर्वा अपि दिशो वितमस्काः कृता इति भावः ॥ ५६ ॥

विधिस्तुषारर्तुदिनानि कर्तं
कर्तं विनिर्माति तदन्तभिन्नैः।
ज्योत्स्नीर्न चेत्तत्प्रतिमा इमा वा
कथं कथं तानि च वामनानि ॥ ५७ ॥

विधिरिति। विधिस्तुषारर्तोः शिशिरर्तोर्दिनानि कर्तं कर्तं छित्त्वा तेषां दिनानामन्तभिन्नैर्मध्यसंबन्धिभिः सारभूतैः शकलैः शुभ्रैः खण्डैः कृत्वा ज्योत्स्नीर्निशा विनिर्माति न चेदेवं नाङ्गीक्रियते यदि तदेमाश्चन्द्रिकायुक्ता रात्रयस्तत्प्रतिमास्तैर्दिनैस्तुल्याः शीतलत्वप्रकाशत्वाभ्यां तत्सदृश्यः कथं। तानि च दिनानि वामनानि न्यूनपरिमाणानि न्यूनशीलत्वादिगुणानि कथं वा अपि तु दिनवामनतारात्रिदीर्घतान्यथानुनपत्तेः शिशिरर्तोर्दिनापेक्षया च ज्यौत्स्नीनामतितमां शीतत्वप्रकाशत्वानुपपत्तेश्च। शिशिरर्तुदिनानि छित्त्वैव तत्सारभूतैश्च शकलैश्चन्द्रिकान्विता रात्रयो ब्रह्मणा वर्धिता इत्यर्थः। चन्द्रचन्द्रिकया रात्रिः शीतला धवलतरा च कृतेति भावः ॥ ५७ ॥

इति श्रीहर्षकृतौ नैषधचरिताख्ये महाकाव्ये
श्रीनारायणविरचितटीकान्विते
द्वाविंशतितमे सर्गे चन्द्रोदयवर्णनं ॥

# ANNOTATIO MAXIMAM PARTEM CRITICA.

---

**Vetâla.** P. 1, v. 4—7. Versus, e Mudrârâxasa nonnullis mutatis desumpti, consone leguntur etiam apud Bhartriharem II, 73 Bohl. et Panc'at. III, 255. — v. 8. ms. प्राञ्जलिं et वक्रं. — v. 16. e C, ubi legitur vocabulum inane प्रभूतकंबि°.

P. 2, v. 12. 13. Distichon legitur apud Galanum Διαφ. 305. — v. 15. AB: भाण्डागारिकस्य प्रति ग्रादेशो दत्तः, quae praepositionis प्रति cum genitivo constructio non sanscritica, sed Bengalica est, unde codicis C lectio praeferenda erat.

P. 3, v. 1. 2. Cf. Panc'at. I, 111, in quo recte °पते: legitur. — v. 3. 4. Similem sententiam vide Hitop. I, 123, eandem prorsus Galan. Διαφ. 28. — v. 5. 6. Cf. Panc'. I, 112. Hit. III, 37 et infra p. 11, 18. — v. 7. 8. Totum distichon e MBh. V, 1414 petitum, ubi v. 8 lectius exstat निःशलाके च; prior stichus debetur Manui VII, 147, apud quem, ut in MBh., पृष्ठं et प्रसादं scribitur; hanc propter mutuationem verborum consecutio turbata esse videtur. — v. 10. C ante मंत्र addit ग्रघोर°, quod vix aptum est; nam res satis horribiles eveniunt. Quum interpretationes Hindust. et Beng. diserte Bhâdrae mensis mentionem faciant, coniectari licet ग्रघोरा, quod proprium est ultimae in isto mense noctis nomen. — v. 16. In cod. C, qui solus haec duo disticha 14—17 praebet, scriptum exstat धीरस्तु सर्वदा त्वेंह्रिद्; ego Lassenium secutus sum.

P. 4, v. 5. In cod. AB (non in C) sequitur longior coemeterii descriptio, ex qua duo tantum disticha imaginem satis concinnam praebentia retinui. ग्राशय scripsi pro ग्राश्रय codicum; °चषका° recte emendavit Aufrechtius pro °चकषा codicis A (B minus bene कपालस्नुयसंकुलं; voluit स्नायु); rem illustrat Raghuv. VII, 49, ubi proelii locus cum Mortis epulis comparatur. विहङ्ग

scribendum videbatur pro वीरेन्द्र A विरेन्द्र. Reliqui versus passim etiam valde corrupti locum non merebantur. Ex parte enim verbis constant inconditis, uti hi:

चञ्चचिताग्नितडितं कालमेघमिवोच्छ्रितं ।
गृध्रकृष्णाङ्गमालभिः कृतप्रलम्बविग्रहं ॥
त्रिजगत्प्रलयाशङ्कं कृतांकारमिवान्तकं ।
मण्डितं मुण्डखण्डैश्च कङ्कालकुलमालितं ॥

in quibus non solum contra bonorum poetarum usum comparatio inter res diversi generis grammatici instituitur, sed etiam maximopere offendit terminatio *am,* quam neque accusativo attribuere licet, quum nihil sit unde is casus pendeat, neque, quem sententia postulat, nominativo, quum मेघ et अन्तक masculina sint, inde explicanda, quod hominibus vulgari dialecto assuetis generis discrimen evanuit, id quod multis aliis codicum locis in editione nostra emendatis ostendi potest; e. gr. legitur सर्वं वृत्तान्तं निवेदितं 9, 6; 11, 3 vel कथितं 21, 15; 22, 10; 26, 2; ईदृं कथं कृतं 21, 21; quin etiam पुरुषं चाग्निवर्चसं in versu ad p. 19, 11 afferendo, in quibus omnibus locis nominativus est. Similia in Panc'atantra notantur a Benfeyo II p. 382. 453 al., nec desunt in Gâthis Buddhistarum et Purânis. Ex parte satis inficetas cum rebus ad Râmâyanam et Mahâbhâratam spectantibus comparationes more Subandhuis (cf. Weber *Zeitschr. d. d. morg. Ges.* VIII, 537) praebent, quarum haec sunt exempla eaque haud infima:

दण्डकारण्यसदृशं मारीचचकितान्तरं ।
लङ्कादाहमिवोत्पन्नं जीवद्रुविणाविघ्नकं ॥
समग्रदुःखनिलयं भूतसंघप्रधर्षणं ।
संचरद्भीमपुरुषं द्वितीयमिव भारतं ॥

In his vox prima composita adverbium habenda videtur. द्रविणा scripsi pro द्रावणा C; A praebet प्रवणा.

P. 4, v. 12. 13. Distichon praebuit cod. C, in quo paulo fusius, congruenter cum Somadeva et interpretationibus Hindust. et Beng., narrari videtur, cadaver in terram deiectum

edito suspirio regem mirabundum permovisse, ut quis esset quaereret, quo facto cachinnatum denuo ab arbore pendisse. Apparet, ita lacunam, quae in priori editione est, explendam esse; sed quum verba ipsa praesto non essent, breviorem codicis A formam non potui quin exhiberem. — v. 16. 17. Hitop. prooem. 48. Galan. Διαφ. 179.

P. 5, v. 1. A सकलं मृगयासमनु°, B °यारसुमनु°, unde vera lectio facile restituta est — v. 8. Pro वीचि, quod hoc loco ineptum est, restitui क्रौंच, nomen avis aquaticae, quae in fluminum descriptionibus commemorari solet. Cf. MBh. XIII, 522. Haeberlin Anth. 529, 8, cet. — v. 11—14. Bhartrih. Suppl. 24 Bohl.; Vair. 50 Haeb. Kâvyaprak. p. 28. — v. 19. Quum quinque sint sensus, Cupidini, cuius vis in sensibus sita est, quinque esse volunt sagittas, quarum nomina ab aliis aliter definiuntur. Cf. schol. ad GîtaGov. VIII, 1 et Williams ad Çakunt. p. 100.

P. 6, v. 9—12. Distichon legitur Hit. II, 46. Panc'. I, 49. Pro नोदिताः illic est देशिताः, hic चोदिताः. — v. 13. 14. Versus e Manu VIII, 26 desumptos habent etiam Panc'. I, 50. Hitop. II, p. 93. Galan. Διαφ. 259.

P. 7, v. 4. Pro वनान्तरात् A (B omisit), quod narrationem turbat, ponendum erat अनन्तरं. Mox in codicibus decem lenarum nomina exhibentur, quae ad fabulam nihil faciunt. — v. 7—16. Narrationem, codices A et B accurate secutus, magis perspicuam reddidi, quam antea erat; necessario autem addendum est ex A पुनः ante पुष्प° v. 11, quod male cum B omiseram. Suspectum videtur पुनश्च in versu 16, quod fortasse indicium decurtatae ex pleniore descriptionis est.

P. 8, v. 4. प्रिप्रविता, quod in ms. legitur, e dittographia ortum est. — v. 10. 11. Distichon e iuris codicibus petitum, quod me legere memini apud Âpastambam VII, 4 et Parâçaram fol. 6, b, vers. ult. editionum a me in spec. biblioth. sanskr. §. 444. 449 commemoratarum. Cf. etiam Râmâyanae

editores Çrîrâmapurani I, 434. Cum infimarum classium mulieribus rem habere sub certis poenis vetitum est. Man. XI, 58. Yag'n. III, 231.

P. 9, v. 8. 9. Panc'. II, 49; IV, 13, ubi भुंक्ते भोजयते चैव, quod emendatorem resipit; Galan. Διαφ. 294. Facultas verbum causale et denominativum adiecta *p* (आपयति) formandi, quae in sermone classico non ultra certas radices in vocalem exitum habentes valet *), sed iam antiquo tempore extendi coepit (सत्यापयति Pân. 3, 1, 25), in lingua seriori ex usu loquelae pracriticae (Lassen Institt. l. pracr. p. 360. Vararuc'es VII, 27) latius serpsit, unde formae भुञ्जापयति (a themate praesentis aucto derivata), जीवापयति, वर्धापनं cet. in libris recentibus et ad usum vulgarem accedentibus frequentiores sunt. — v. 16. AB त्वया सह देव quod quum explicari nequeat nescio an minus feliciter emendaverim; तदेव saltem certum videtur. Pergit A: कारणं तस्याः B: स्नेहकारिणी तस्याः. Versus qui sequuntur satis turbati erant. Uterque codex habet जननीं, pro quo, quum non sit cur mater omisso patre commemoretur, dualem posui, deinde A: बाधवलोकवस्तूनि जीवं च, B: बांधवलोकं व वस्तु नो जीवनं च, in quibus वस्तूनि metro adaptari nequit, वस्तु minus perspicuum est; tum A: °विशेषाः प्रोक्ताः, B: °विशेषाशक्ताः, quod pro °सक्ताः scriptum esse iam Aufrechtius indicavit. तृणाय e B ponendum erat pro तृणमिव A, quia metrum hoc loco proceleusmaticum non patitur, nisi post primam syllabam caesura minor sit.

P. 10, v. 2. दह्यति e B; A, qui तह्यति praebet, voluit aut illud aut तप्यति. Ad rem cf. etiam epigramma Bhartriharis II, 67 Bohl.; 31 Haeb. Ex mente auctoris ignis admovetur fervefaciendi lactis, non aquae causa. — v. 10. ततः scripsi pro पुनः A, quod huius loci non est. — v. 15. A ubique habet कोटिपाल, B कोटपाल secundum hodiernam in dialectis vulgaribus appellationem. Quum sanscritica forma restituenda esset, eligenda erat non

*) In Râmâyana II, 14, 21 Schl. आनापितुं lectio est codicum, qui Raghunâtham sequuntur; libri scholiis Maheçvaratîrthae instructi आनायितुं praebent.

media illa quae perhibetur कोट्ट°, sed antiquior कोट्टपाल, cuius in lexico Petropolitano e scriptoribus non illustratae exemplum e Panc'atantrae codicibus praebet Wilso *Trans. RAS.* I, 185. — v. 20. A: मण्डलं पूजयित्वा. Sed cum haec vocabula apte coniungi non possint, inserendum erat कृत्वा, quod in B, quanquam postea deletum, inter utrumque exstat; पूजयित्वा sine obiecto ferri potest. Aufrechtius मङ्गलां, nomen Durgae, proposuit scribendum.

P. 11, v. 10. गृञ्जनं, quod idem est atque कुभुक्तं supra p. 3, v. 4, habent AB et Çârngadharae Paddhatis cod. L apud Boehtlingkium *Bulletin hist. phil.* VIII, 153. Ubi praeterea distichon exhibetur, Hit. I, 122, C'âṇakya 34 Haeb. et, teste Aufrechtio, in Paddhati Oxon., वञ्चनं bene legitur. Galanus Διαφ. 27 vertit λογομαχίαν वचनं. Ceterum huc versus tunc tantum quadrat, si antea, uti fit in interpretationibus Hindustanica et Bengalica, rex secreto in consilium ivisse dicatur, quod in sanscritica narratione excidisse videtur. — v. 14. Similia invenies Panc'. I, 217. De feminis idem praedicit MBh. XII, 4895: सर्वथा स्त्री न हन्तव्या, contrarium Manus VIII, 371 et Yâg'navalkyas II, 278. — v. 20. 21. Distichon et fabula, ad quam alluditur, exstant Panc'. I, 222, unde mendoso कोकिलो medela quaerenda erat. — v. 22. sq. Panc'. V, 16, unde hausi नकुलात् pro नकुलं ms. Fabula sequitur et etiam in Hit. IV, XIII invenitur. Pro अपरीक्षितं in Panc'. est अपरीक्ष्य; apparet hanc esse emendationem, factam ut quinta primae dipodiae syllaba, quae antiquitus licita est, tolleretur.

P. 12, v. 4—7. Narratio de Sîta rapta, dum Râmas maritus a Mâric'o daemone in auream dorcadem mutato abstrahi se passus est, exstat in Râmâyana III, c. 48 sqq. Gorr. indeque repetita in Benfeyi Chrestomathia. Nahusham priscum regem, quem sacerdotibus dominandi cupidis minus obsecutum esse probabile est, quum Brahmanos lecticae subiungeret et pedis ictu impelleret, in serpentem ferunt mutatum

esse. MBh. I, 3151. III, 12460. V, 468. 527. XIII, 4753. De Arg'una Kritavîryae filio narratio invenitur MBh. III, 10191 (male 11091) p. 572. cf. XII, 1760, 13888, sed ibi vitulum tantum rapuisse dicitur; distichi auctor igitur eam narrationis formam spectavit, quam BhâgavataPur. IX, XV praebet. Yudhishthiram cum opibus etiam fratres et Draupadim, suam et fratrum uxorem, alea perdidisse e secundo Mahâbhâratae libro notissimum est. Ceterum cf. Panc'. II, 4.

P. 13, v. 9. B संगितं, quod ad emendandam codicis A lectionem, in qua tautologia omnino non ferenda est, non confert. — v. 11. Pro मृग B: तथा, C et Hind.: मघा. In fine mss.: °का. — v. 13. A: इंद्रियोश्च्रोश्त्र्यो: B: इंद्रियैश्चेष्टयेत् C: इंद्रियेषु च सर्वेषु. In priori veram lectionem inesse puto, sed quodnam vocabulum in corrupto इंद्रियो: lateat, non efficio. Inde reliquae lectiones originem duxerunt. Vocabulo *indriya* hic locus non esse videtur, praesertim quum singula, quae ad sensuum organa Indi referunt, iam sequantur. Sed meliora non habens retinui, quum etiam interpretatio Hind. incipiat इंद्री अधर् etc. — v. 14. A: त्रङ्गोरु, C: उर्वोश्च. — v. 16. A (et C?): मध्ये तु, pro quo Benfeyo monente °षु ponendum erat. Tandem pro दृष्टो यो, quod C praebet (sine स), AB habent प्रमदा च, quod intelligi nequit, nisi versus statuas truncos esse. — v. 19. तृम्भणां ex AB.

P. 15, v. 1. ms. सिक्ता. — v. 6—9. In regis responso pleraque tam aperte metrica sunt, ut editoris fuerit disticha prorsus restituere. E codicibus solus A verba haec praebet, reliqui forsan formam narrationis habent apud Somadevam et in interpretationibus exhibitam, ex qua tres tantum proci sunt et is, qui in coemeterio mansit, maritus declaratur. V. 8. in codice ita legitur: येन श्मशाने भस्मनासंगृहीतकृतस्थित:, quae verba per se emendatione egebant. Beng. p. 36, 10 habet भस्मराशिसंग्रह पूर्वक. Magis accederet भस्मनां संग्रहं, quod scribere nolui, quum mihi de usu pluralis non constaret. Codicis in reliquis ver-

sibus lectionem ostendit editio prior. — v. 18. तनोक्तं necessario addendum erat.

P. 16, v. 9. यथावसरं dedi pro सर्वावसरे B °रै A, quod huc non quadrat; यथाव° etiam in Bengalico libro legitur. — v. 15. Bene Beng. असारे संसारे. — v. 17. 18. Distichon petitum e MBh. XII, 6245, ubi suo legitur contextu (var. lect. दुग्धं श्रेय उदप्रिवतः et वरः); ad aliam sententiam conformatum exstat Panc'. III, 100.

P. 17, v. 3. 4. Galan. Διαφ. 49. — v. 20. मार्गे व्यावृत्य cum B omisi, quum repetitio sit vocabulorum मार्गे लग्ना सती. Tum तैः ante बान्ध° prorsus inane, etsi uterque codex habet, eieci. v. 22. A: चौरोढः B: चौरैरुढः quod ferri potest; sed magis e re videbatur, quod Hind. et Beng. praebent, बढः

P. 18, v. 8. Pro वधं° B: श्रार्तिकां चक्रुः in quo inesse videtur vocabulum a Wilsone allatum, in lexico Petropolitano omissum श्रर्तिकः *a kind of cake*. — v. 13. 14. Hit. II, 38. Galan. Διαφ. 57.

P. 19, v. 3. 4. In disticho propter सापि sequens non omittendo A habet त्रूपकेलिला° B विद्रूपकेला°; Aufrechtius iam veram lectionem restituit. Pro पक्व A: पाक. Uterque समये. — v. 5. ms.: भवने परिष्ठिता. — v. 10. B: एकान्ते मनोरथं अभिलषति Sed quum मनोरथ semper sit *desiderium, optatio*, verba minus apta sunt; alia ratio est loci MBh. III, 1851. — v. 11. Post श्राग° sed loco narrationi non prorsus apto sequuntur disticha duo, quorum prius nonnullis verbis mutatis invenitur MBh. XIII, 2227 et Hit. I, 110:

सुस्नातं पुरुषं दृष्ट्वा सुगन्धं मलवर्जितं ।
क्लियन्ते योनयः स्त्रीणामामपात्रमिवाम्भसा ॥
घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
संश्लेषाद्द्रवते कुम्भस्तद्वत्स्त्री पुंसभाविता ॥

Posterioris prior stichus exstat Hit. I, 112. C'âṇaky. ap. Haeberlin. 77. A: पुरुषं चाग्निवर्चसं (sic). Tum A: स्त्रीपुंसभाविते B: स्त्रीपुंसभाविता. Aufrechtius voluit स्त्रीपुंसभावना *eadem viri et mulieris conditio;* sed hic de muliere tantum sermo esse debet, quod et ipsum me prohibuit, quominus proponerem भावितं (भावितात्

longius abest) *colloquium*, unde सभाजिता dedi. — v. 15. 16. Sententiam in codd. turbatam distichon efficere tam manifestum erat, ut restituendi periculo supersedere non liceret; praeivit Brockhausius *Berichte der Sächs. Ges. d. Wiss.* p. 199. B: को मां धर्तुं समर्थः (pro quo A inepte कृ भतरि नेछति) C: धारयितुं, quod maxime aptum क्षमः subiungendum postulabat. B: न बुभुक्षा न तृषा न निद्रा शीतोष्णं न रोचते et ita omissis primo et tertio न et addito post quartum च etiam A; nec differre videtur C atque prorsus eadem legit interpres Hindust., unde apparet, distichon iam tempore quo versio vrag'ensis confecta est ita depravatum fuisse. Cuncta autem illa non patitur versus. Aufrechtius proposuit रोचये. — v. 18—21. Versus fuerunt, eiusdem sententiae atque Hitop. I, 107. 108 (= Man. IX, 13), sed nimis turbati, quam ut nisi vi illata restitui possint. Apparent tamen metri Âryae numeri, quos iungere ita ut integri stichi oriantur facile est:

निर्यन्तृपाता प्रवाससमवस्थानं विदेशवासश्च ॥

et पत्युरुपघात ईर्ष्या चेति स्त्रीणां विनाशकरणानि ॥

P. 20, v. 5. 6. Elegans distichon a cod. A exhibitum omittere nolui, quanquam ex metro paululum laboret. — v. 12—16. Eadem stropha paucis mutatis exhibetur in schol. ad Gît. Gov. VII, 2 p. 95, unde भरतस्तां mutuandum erat pro परमंत्रां A. In B legitur °योगात्यजति परमतंत्रं, quo quid voluerit scriba obscurum est. Ceterum apud Viçvanâtham p. 53, 7 ed. pr. p. 48 ed. post. ea quae hic describitur melius vocatur विरहोत्कण्ठिता, et विप्रलब्धा est, quam consulto negligit amasius. — v. 18 स्त्री pro सा Aufrechtii emendatio est. In codicibus dubium est utrum स्वर (Aufr.) an ज्वर (Lass.) exstet; ज्वर tamen vera lectio est. Pro श्रान्ति° legere possis श्रति°. — v. 21. A praebet °स्थाने चौरेण भणित्वा केनापि व्या°, B idem, nisi quod चौरो habet. Verbis his non integris Brockhausius l. l. p. 200 subesse putavit, hominem furatrinae suspectum ab urbis custodibus esse interfectum, id quod cum Somadevae fere nar-

ratione congruit. (Quo posito, de verbis इति भावयित्वा sive भावितत्वात्, quin इति भणित्वा cogitari potest). Aufrechtius proposuit चौरेण केनापि मिलित्वा, inverso vocabulorum ordine. At de latrone sermo hic esse nequit, quum post alius latronis mentionem necessario significandum fuisset, alterum ab altero diversum esse, unde saltem hoc mutandum et aliud quid, e. gr. वैरिणा, scribendum esset. In libris Hindust. et Beng. serpentis morsu moritur, quod rei naturae magis consentaneum est; nam vir vi occisus aperto vulnere iacens annon viveret, dubia esse vix potuit mulier. Quum igitur de certa emendatione ex literarum ductibus efficienda (nam घोरेण फणिना poeticum dicendi genus nimis sapit) desperassem, substitui quod Beng. praebet: कालसर्पेण.

P. 21, v. 1. 2. Distichon exstat etiam in Sâh. Darp. p. 303. ed. pr., 285 ed. post., ubi recte तन्मयं pro तं A, तन्महं B legitur. Idem habet सैव तथैका et in priori sticho विकल्पे. — v. 3. Nomina actionis in *ana* exeuntia etiam eum sibi casum iungere possunt, quem notio verbalis postulat; exempla in hoc libro sunt accusativi 17, 13; 19, 12; 36, 3; 55, 7, ablativi 12, 5. Aliunde petita: तं न कश्चन निवारणे ऽभवच्छक्तः Nal. 7, 10. रुदतीं गृहात्प्रसह्य हरणं राक्षसो विधिरुच्यते MBh. XIII, 2411 = Man. III, 33. Plerumque tamen observare licet in perspicuitatis gratiam casus esse diversos et rariora ea esse, in quibus ab accusativo accusativus pendeat, quale est MBh. XIII, 2051 न त्वां कश्चित्समुत्सहेत् ग्रहणं कर्तुं. Ubi talia in recentioribus libris occurrunt, explicanda videntur ex usu dialectorum vulgarium e. gr. Bengalicae, in quibus quovis fere versu locum habent. — v. 7—10. Stropha e Bhartrihare II, 2 petita, quam etiam e Sinhâsana-dvâtrinçatis codicibus Londinensibus descriptam ante oculos habeo. In hemistichio secundo melior lectio °सक्तः pro °रक्तः in mss. exstat; in tertio Bhartriharis libri et alii constanter परितुष्यति praebent, quod verbum huius loci sensui repugnans argutius tantum explicari potest. In Sinh. codice

uno परिखिद्यति, in alio परितप्यति legitur, quod praetuli quum magis accederet ad °तुष्यति.

P. 22, v. 1. 2. न विश्वसेत्कृष्णसर्पस्य A. B. Sed metrum negationem delere iubet, quo facto sententiae etiam vis augetur; Hind. tamen eam expressit neque in similibus distichis MBh. V, 1390. Gal. Διαφ. 26 (= C'âṇ. 27 Haeb.) 151. 188 deest. Lassenius, ut eam servaret, genitivum in locativum °सर्पे mutavit. Tum A: अनिवार्य B: आचार्य, unde efficiendum erat अवार्य; sed vera lectio restat ut circumspiciatur. Hind., qui pro his praebet चञ्चल चित, legisse videtur चित्त pro वित्त. — v. 5. 6. Etiam hi versus in Sinh. dvât. exstant. अश्वप्लुतं haud prorsus congruum videtur, explicari tamen potest. Aufrechtius coniecit ग्रग्राप्लुतं; apud Hind. est عيب, *vitium equi*, quod non spernendum videtur, etsi non videam, quamnam vocem sanscriticam legerit. Pro माधव in uno cod. Sinh. est वासव, Hind. (बादल) legit वारिद. Pro भवि° Hind. habuit पुरुषस्य भोगं, melius Beng., apud quem haec una vox servata est, भाग्यं. In altero sticho praetuli चाप्यतिव° e Sinh. petitum lectioni चापि सव° AB.

P. 23, v. 12. Narratio haec etiam in Hitopad. IV fab. 8 et in Muhammadis Qâdirii *Tooti name* p. 24 ed. Gladwin reperitur. — v. 13. Pro स्थान dandum erat आस्थान. — v. 20. सहस्र e वस्त्र B restituendum erat. Hiat A.

P. 24, v. 1. A सेव्याः संजाताः B: सेर्ष्याः समायाताः — v, 7. Uterque प्रहरकं; A ददा, B ददाति. Quum प्रहर temporis nomen sit neque excubias significet, lectio perquam dubia est. — v. 10. 11. Hit. II, 22. — v. 12. 13. Idem distichon paulo variatum vide Panc'. I, 299, cuius libri codex Berolinensis teste Benfeyo ad h. l. ad nostram lectionem proxime accedit. — v. 16—19. Bhart. II, 48. Hit. II, 26, e quorum lectionibus recipiendum erat दूरतो pro दूरगो.

P. 25, v. 4. 5. C'âṇakya 21 Haeb., ubi आपदि काले. Ms. आपत्काले syllaba una deficiente. Gal. Διαφ. 143. — v. 12. Uterque cod. रोदते, sed haec forma nulla est neque mutationem in रोदिति

patitur metrum. Sensus certo is est, quem versio Beng. exprimit রোদন করিতেছে কিন্তু আশ্চর্য্য এই চক্ষুতে অশ্রুর লেশমাত্র নাই flevisse eam, sed miro modo ita ut ne minima quidem lacruma in eius oculis conspiceretur. Possis scribere रोदने ऽप्य°, sed hoc minus placet quam रुदती. — v. 13. AB अहं दुःखी च (B व). Quum masculinum cum अहं coniungi omnino non possit, de rege sermo intelligendus est et अहं in अहो mutandum.

P. 26, v. 4. 5. Eadem sententia Gal. Διαφ. 107; similes MBh. XII, 5229. Gal. Διαφ. 14. — v. 6—9. Idem versus verbis paulo aliter dispositis MBh. V, 1057. Hitop. pr. 18. et Ashṭaratna ap. Haeberl. 1, unde pro यशस्वी codicum recepi aptius वयस्य, quod etiam interpreti Hind. prae oculis fuit. — v. 10. Ms. अविनीतो जनो, deficientibus tribus moris, unde secundum Hind. (چاكر) et Galanum in eodem versu Διαφ. 328 (ὑπηρέτης) addidi भृत्य. — v. 12. Pro अनुराग mss. dedi अपराग; confirmat hoc Galanus Διαφ. 327 ἀτιμία = अपमान, qui praeterea legit क्रव्यस्य. — v. 16. 17. Panc'. I, 114. 388. — v. 22 sq Râm. II, 39, 30 Schl. (apud Gorr. 38, 25 alter stichus variatus est) MBh. XII, 5566. Panc'. III, 156.

P. 27, v. 9. Supplendum est या; cf. Lassen ad Hit. I, 54. 62. — v. 19. 20. Galan. Διαφ. 36. A: सह् B सा सा; ex utroque effeci सा हि. B: एव A: ज्ञेया. सा eodem modo positum est, quo mox तादृशाः.

P. 28, v. 17. 18. Cum aliqua varietate legitur distichon Hit. III, 138 et nostro fere aequale Gal. Διαφ. 284. — v. 20. 21. Panc'. II, 146. 444. Galan. Διαφ. 262. Simile quid Sâvitr. II, 26. Puellam semel tantum dari iuris regula est. Man. IX, 47. Yâg'n'. I, 65.

P. 30, v. 1. Pro मुषन्ति codicum, praesertim quum verbum non sit sextae coniugationis, scripsi मुष्णन्ति. — v. 6. Uterque cod. °युगे महाराज ए°, mutatum iubente metro, quod etiam in reliquis delectum lectionis facilem et certum reddidit. — v. 9. Pro हि quod sententiam turbat, dedi अति. Maxime

autem offendor ultimis versus verbis, in quibus codices consentiunt. Sive enim वैष्णवाः sive, quod licet et Aufrechtio placuit, श्रवैष्णवाः *alii ac Vishnuitae* intelligantur, vix mihi persuadere possum, tantam inter Çivaitas et Vishnuitas fuisse simultatem, ut sibi invicem doctrinarum studium inviderint. Alias, cuius rei ratio in promptu est, scientiae ad inferas incestasque hominum classes descensus inter ferreae aetatis signa numeratur e. gr. MBh. III, 13072, atque sic in Bengalica narratione commemoratur, hostili hominum vilium argumentatione sacrorum librorum mysteria profanata esse. In versione Hindustanica, quae p. 135. et accuratius etiam in fabula XXIII p. 347 hos versus reddit, nil tale legitur, sed alia adsunt, quae hic desiderare possis; e. gr. amicitias in inimicitiam conversas esse.

P. 31, v. 7. 8. Similiter C'âṇ. 50, unde °दाने pro दान mutuatus sum et Galan. Σαναϰ. II, 1. हृत zeugma est, nisi legere velis हृत, quod vocabulum quia generatim pessumdandi notionem habet, etiam de Sita usurpari potuit. — v. 21. 22. Galan. Διαφ. 61.

**Çuka.** P. 32, v. 8. तत्रैव — श्रेष्ठी addidi e Galano; quum narrationis cardo in eo sit, ut iura et officia a patre in filium deferenda sint, haec omnino non possunt deesse. — v. 12. L. मालज्ञाति G. मालती; dedi मल quod vocabulum in hac re solenne est, haud infitiatus, veram lectionem fortasse aliam esse.

P. 33, v. 4 sqq. O haec ita exhibet: ११ मूर्छना ७ स्वर ४९ ताला ६ राग ३६ भाषादिरूपे गीते च पुटादितला १०८ करा ४. Emendatione, ad quam doctrinae Indorum musicae cognitione opus est, abstinui; pro भाषा fortasse legendum erit भाव. Enumerationem non omnino diversam praebet Panc'. V, d. 43—45. In sequentibus v. 6. 7. secutus sum cod. O, nisi quod pro सामदा° ponendum videbatur समिदा°. — v. 21. O: मार्गपरिभ्रष्टः, quod s ante परि° negatio addatur fortasse praestabit.

P. 34, v. 3. Pro बन्धमया°, quod corruptum est, nihil faci-

lius quam बन्धनया° substitui posse videbatur. — v. 8 sqq. Historia haec de धर्मव्याध copiose enarratur in MBh. III, 13652—14095. — v. 12. उपरि स्थितां scripsi cum lex. Petrop. s. v. उपरि pro उपरिष्ठितां; sed O quoque habet उपरिस्थां, sicut etiam p. 19, v. 5 codd. भवनोपरिष्ठिता voluisse videntur. Fortasse igitur forma haec parum probanda recentioribus scriptoribus non abiudicanda est.

P. 35. Post v. 8. inserit cod. Oxon.

मातापित्रोर्भरकक्रियामुद्दिगपायाकः ।
मृतश्रैाय्याप्रतिग्राहि न भूयः पुरुषो भवेत् ॥
धर्ममेवं श्रुत्वा गत्वा पित्रोर्भरो भवा । व्याधेन etc.

qui versus, quanquam arctissime pertinent ad narrationem, quum verbis deformatis certam medelam non haberem, in annotationem relegandi erant. — v. 12. 13. Transposui verba पुत्रेण — °न्तरं, quae aperte huc referenda sunt et post अनुज्ञातः v. 14 posita narrationem turbarunt. In editione priori versuum speciem prae se ferebant, obstabat tamen देशान्तरं metro hic prorsus contrarium. Itaque adhibito cod. O prosae orationi inserui et देशान्तरैव, quod ex dittographia ortum videtur, sustuli. — v. 20. वरो scripsi pro करो in Ox. — v. 22. Non tolerandum erat कतिपयदिन°, in quo bis contra metri leges peccatum est.

P. 36, v. 6. देवनां dedi pro देवतां. — v. 14. Codd. et Galanus (ὁ πονηρός) दुर्जना, quod hoc loco prorsus ineptum esse (uti etiam Galanum a recte intelligendo कौ° abduxit) Benfeyus quoque *Gött. Gel. Anz.* 1856. p. 1829 indicavit. Posui दुर्जया, quo significari potest, eum, qui rebus periculosis studeat, talem esse debere, qui non facile de successu desperet neque se deterreri et differri patiatur.

P. 37, v. 1. Narratio haec in Persico Muhammadis Qâdirii Tûtînâme alio loco exstat, p. 63. Gladw.; magis nota est per librum septem sapientum (cf. MI. Noct. II, 63 Bul.; III, 140

Macn.; XII, 293 Fleisch. Syntip. p. 54. etc.), ex quo fonte in occidentis rivos manavit.

**Fabula II.** Distichon 28. similibus verbis pluries legitur MBh. XII, 5310. Hit. IV, 102. Mallinâth. ad Kirâtârg'. I, 12. C'âṇâkya 33 Haeb. Galan. Διαφ. 22. 24; aliis verbis declaratam et simili, sed diversa fabula illustratam sententiam invenies Panc'. IV, d. 74.

**Fabula III.** Eadem sed aliter narrata legitur Hitop. IV, fab. 6. D. 7. Scripsi श्रिष्य, quanquam श्रिष्ट ferri possit. — d. 13, b. तं referendum est ad उवाच; sed verisimile est aliquid excidisse. — d. 31, b. Pro वन्यं editio praebet वनं. — d. 41, b. Editio स्वयोनितः, quod sine argutiis defendi vix posse videtur.

**Kandu.** D. 9—36. in utroque codice Lond. desunt; 12—36 locus est Mahâbhâratae III, 11559—11580, in codicibus ab hoc fere non recedens, sed iam a Lassenio amputatus, ne nimis longa descriptio arborumque et volucrium cet. enumeratio taedium crearet. Ad verba emendanda Mahâbhâratae editio utilis erat. Postea quae leguntur d. 44—62 desunt in B. — d. 11, a. Ita O; P: सलिलेशयः. — d. 15, a. आसिरे posui pro आसस cod. P., quo uno in hoc versu uti licebat. — d. 27, b. उटजं metri emendandi gratia dedi pro आश्रमं P.; mendose O: त सार्ढं वराङ्गना. — d. 35, a. P. श्रियपुत्रैः quod inane esse et cum O in प्रि° mutandum videtur, quum पुत्रप्रिय nomen avis sit atque in MBh. in simili loco III, 9927 et hic प्रियकैः exstet. Hoc quidem ipsum, Wilsonem si audis, non avem, sed apem significat, at in Suçruta I, 203, 1. 10 inter animalia ad vescendum apta recensetur. — d. 55, b. A. षोद्शाब्दाकृतिं तथा, quod metro convenit, sed contra grammaticam peccat et eandem generis confusionem exhibet, de qua supra p. 100 dixi; O. द्विरयूदुष्टवर्षाकृतिं P. द्विरवत्सराकृतिं, ex quo collato O efficeres द्विर-ष्टवत्सराकृति, nisi illicitus esset diiambus. Substitui igitur formam वरिष. — d. 57, b. Omnes codd. अहो ऽस्य तपसो, neglecta lege, ex qua अहो particula sequens अ loco non pellit. —

d. 62 b. AO मन्दर B -ह; in द्रोण्यां consentiunt codices. Loco dubio dictum esse putavi, Kandum per totum tempus socordiae atque desidiae deditum, religionum exercitii immemorem in tugurio mansisse, ex quo primum v. 72 exit. — d. 60 a. Codd. मासार्डनह्रा° et मासंद्वयनह्रा°. — d. 83, a. O: ब्रह्मन् ब्रह्मविदां वर; A: ब्रह्म et वराः; B: ब्रह्मन् et वरः; P verba omittit. Videtur lacinia esse alieno loco assuta, quam ne delere versumque mutilatum exhibere oporteret, primum vocabulum mutavi. — d. 87 b et qui usque ad finem sequuntur versus desiderantur in P. — d. 88, a. Proverbium. Panc'. II, 47. IV, 70. — d. 90 b. Hunc stichum aliunde petitum, at narrationi perquam consentaneum Lassenius substituit verbis in codicibus, etiam in Oxoniensi, tam depravatis, ut quid voluerit poeta non perspiciatur:

O. त्वया धिक् त्वां महामोहमंज्ञसां तु ज्ञुगुप्सितां
A. त्वां" धिक"वि"ग्रहां मोहद्ज्ञूषां सु"ज्ञुगुप्सितां
B. त्वया धृष्टि"""महा मोहमंज्ञुपास ज्ञुगुप्सितां

d. 95 et 96 a desunt in A. — d. 96 a O मांसमाप्यायितो गोभिः स तदा. Quam dedi lectio est cod. B. Conferenda est versio Vishnupurânae p. 112, in qua additur versus, quo hic aegre caremus: *The trees received the living dews and the winds collected them in one mass. This, said Soma, I matured by my rays.*

**Rishyaçringa.** D. 5—8, a pro iis quae apud Gorresium 8. 9 a exstant, sumpsi e cod. G, uti versus hos aptissimos iam Schlegelius receperat praeter v. पूपपत्र°. — d. 7 b. Cod. नानावस्त्रसमावृत्ताः सुगन्धा पुष्पधारिणाः, in quo offendunt vocabulum समावृत्ताः et disiuncta verba, quae si cum Schlegelio coniunguntur सुगन्ध° metrum laeditur. Sed facili coniectura utrumque emendari potuit. — d. 54 b. Gorresius श्रग्रां dedit e cod. K, sed I et edit. Çrîrâm. श्रग्र्यां habent. Illud exemplum esset adiectivi Indorum lexicographis confessi, in lexico Petropolitano addubitati neque mendosa in Meghadûta lectione confirmandi.—

